कुलदेवतास्तुतिः

कुलदेवीं वल्लेलाम्बां
स्वेष्टदेवो वृषाकपी ।
वन्दे वेङ्कटरामाख्यं
पितरं पण्डितोत्तमम् ।। 1

श्रीवाणीं कुलदेवतां धृतवतीं श्रीवल्लेलाम्बाकृतिं
वन्दे श्रीहरिशङ्करौ च जगतामीशौ वशा भक्तितः।
तातं वेङ्कटरामपण्डितवरं तद्भ्रातरं पण्डितं
शेषाख्यं च जगद्गुरून्मम गुरून्स्तत्त्वोपदेष्ट्रूनपि ।। 2

शेषाख्यं विबुधं पितृव्यमपि मद्विद्यागुरुं राघवा-
चार्यं नौमि षडङ्गवेदनिचयाभिज्ञं यशोवारिधिम् ।
अन्यं वेङ्कटरामनामकबुधं वन्दे गुरुं ज्ञानदा-
नाचार्यानपि मल्लिकार्जुननरो भक्तो मुरारे रहम् ।। 3.

श्रीमान् षड्विधदर्शनादिचतुरो, वेदान् षडङ्गानि चा-
धीत्यासेतुहिमाद्रिभास्वरयशाश्श्रीकाळहस्त्यां स्थितः ।
गृह्णात्वद्य नतीः स राघवसुधीर्विद्यागुरुर्होतुरू
वासी वेङ्कटरामनामकसुधीश्चान्योपि विद्यागुरुः ।। 4.

श्री महागणाधिपतये नमः **श्री महासरस्वत्यै नमः**

श्री गुरवे नमः ।

श्रीमदल्कूरु

श्रीमत्पण्डितसार्वभौमेत्यादिबिरुदावलीविराजित

श्री मल्लिकार्जुनसूरिविरचित

श्रीवासुदेवानन्दे

अनुप्रास - चित्रपादः प्रथमः

श्रीमान् विष्णुश्शरण्यः शरणमशरणस्यास्तु मे कुङ्कुमाद्रि-
प्रारूढः प्रावृषेण्यो नवजलद इवाभ्रंलिहस्वर्ण शृङ्गम्।
अद्यासीनः सुपर्ण मसृणमसितरुग्रुक्मवासा महीयान्
दिष्ट्याभ्यागारिकस्याप्यगणित सुगुणार्णोधिरेतैः प्रणामैः।।

श्रीवाणीं कुलदोवतां धृतवतीं श्रीवल्लेलाअंबाकृतिं
वन्दे श्रीहरि शङ्करौ च जगतामीशौ वशौ भक्तितः ।
तातं वेङ्कटरामपण्डितवरं तद्भ्रातरं पण्डितं
शेषाख्यं च जगद्गुरून्ममगुरूंस्तत्त्वोपदेष्ट्रूनपि ।।

श्रीमान् षड्विधदर्शनादि चतुरो वेदान् षडङ्गानि चाऽ
धीत्यासेतुहिमाद्रिभास्वरयशाश्श्रीकालहस्त्यां स्थितो।
गृह्णात्वद्य नतीः स राघवसुधीर्विद्यागुरुर्होतुरू
वासी वेङ्कटरामनामकसुधीश्चान्योपि विद्यागुरुः।।

अनुप्रासचित्रपादः प्रथमः

अथ अनुप्रासानां लक्षणानि तद्भेदाश्च

1. एकव्यञ्जनकस्यासकृद्द्वयोस्तु सकृदव्यवधिना स्यात् ।
व्यवधाने वा सकृदप्यावृत्तौ "वृत्त्यनुप्रासः" ।।

2. अपि च त्र्यादीनां सकृदसकृद्वा व्यवधिनाऽव्यवधिना वा।
स भवेद्व्यञ्जनकानामावृत्तौ "वृत्त्यनुप्रासः"।।

3. आवृत्तिरव्यवधिना यत्र व्यंञ्जनयोर्द्वयोः ।
असकृत्सँभवेत्तत्र "छेकानुप्रास" इष्यते ।।

4. शब्दार्थयोरभेदेन पौनरुक्त्ये स्थिते सति ।
तात्पर्यमेव भिन्नं चेत् " लाटानुप्रास " इष्यते ।।

5. अष्टौ विभेदास्स्युर्वृत्ति "छछेक्कानुप्रासयोः" पृथक् ।
प्रथमस्स्यात्पादसन्धिगतश्चापि पृथग्विधः।।

6. द्वितीयस्स्यात्पादसन्धिगतश्चाप्यपृथग्विधः।
तृतीयस्सपरिज्ञेयो योऽपूर्णश्च पृथग्विधः ।।

7. चतुर्थस्सपरिज्ञेयो योऽपूर्णश्चापृथग्विधः।
पञ्चमस्सपरिज्ञेयो यः पूर्णश्च पृथग्विधः ।।

8. षष्टस्तु सपरिज्ञेयो यः पूर्णश्चापृथग्विधः।
सप्तमस्त्वेकदेशस्थोह्यष्टमो मिश्रलक्षणः ।।

9. चतुर्ष्वपि च पादेषु वर्तते यो मुहुर्मुहुः।
पूर्णस्सतु परिज्ञेयः ततोह्याऽपूर्ण उच्यते ।।

10. पादे पादेऽथवा पादभेदे यस्तु विभिद्यते ।

पृथग्विधस्स विज्ञेयः ततोन्यस्त्वपृथग्विधः।।
अथ रम्यं शब्दचित्रं लक्ष्यलक्षणवद्ब्रुवे।
मञ्जुलार्थरसव्यङ्ग्यं विष्णवीशं गुर्वनुग्रहात्।।

शव्दचित्रान्यसङ्ख्यानि सुगुणा इव शार्ङ्गिणः।
अतः कात्स्न्र्येन को वक्ताऽतस्माद्वक्ष्यामि कानिचित्।।

चित्रयुतेऽस्मिन् विष्णुस्तवे प्रयोगोऽस्ति नाऽप्रसिद्धपदः।
वाप्येकाक्षर नानार्थ रत्नमालादि कापेक्षा ।।

अथ वृत्त्यनुप्रासानामुदाहरणानि

प्रथमो यथा

11. पायान्नित्यं जगदिदं जगदादिस्सुदर्शनैः ।

सुदर्शनं वासुदेवो वसुदेवसुतो दधत्।।

अथ द्वितीयः

12. सुविमलचेतो नीरज! नीरज ऋभुमकुटमणिखनीराज्या ।

नीराजितपदनीरज नीरुज नारायणस्य शरणं त्वम् ।।

व्याख्या:- सुविमलचेतोनीरजानां, अत एव नीरजसाम्, रजोगुणरहितानाम्, सात्त्विकानामिति भावः। ऋभूणां देवानां मकुटमणिखनीराज्या नीराजित नीरुज - नीरोगनारायणस्य हे पदनीरज ! त्वं शरणम् ।

अथ त्रतीयो यथा

13. हरिनीलरुचिरनुरुचेर्हरेः कथा कथयतोऽस्य मे चित्तम् ।

न चलति चलतीत्यत्र तु कृतिः परीक्ष्यास्ति नास्ति पारोक्ष्यम्।।

14. करुणा सरणीं कणीयसा, मनसा वेद्मि कथं रमेशितुः।
धरणीधरमुद्धरन्स्त्वयं समरक्षत्किल धेनुधेनुपान् ।।
15. हित्वा श्रुतिशतसमुदितहरिचरितं श्रयति यस्सुखाय नरम्।
मूढः कृष्णां हित्वा धावति मृगतृष्णिकां स सिष्णासुः ।।
16. दधदरविन्देन्दीवरबान्धवदृग्युगलमिन्दिरादयितः।
कमलानन कमलेक्षण कुमुदविकासं सदा न किं कुरुते ।।
17. मन्दारविन्दबृन्दं वदनेन किलेन्दिरानेतुः।
तुलनां कलयितुमचलं सलिले विमले तपः कुरुते ।।
18. अयमानन्दाय हरिर्दयमानमनामास्तु मनसो द्राक् ।
न्वविलासिनी विलासप्रविलसदुपगूहनोत्थदरहासः ।।

चतुर्थो यथा

19. सुन्दरं वदनमिन्दिरापतेर्मन्दरे सरसि चन्दिरोपमम्।
इन्दिरेशपदसेवकैर्जितं चन्दिरेस्ति तम एणकैतवात् ।।
20. नारायणोऽनन्तगुणो निर्गणोर्चां वृणोतु मे।
कृपणोद्घरणोद्युक्तधिषणो निपुणोवने ।।
21. अचञ्चलप्रज्ञविरिञ्चनस्तुताः
दवञ्चितस्वाश्रितसञ्चयाद्धरेः।
प्रपञ्चपा, द्भोगिपमञ्चशायिनो
नकञ्चनान्यं स्तवनञ्चयैस्तुमः ।।
22. स्मरणाभिलाषि- शरणागतालका। भरणायितस्वचरणाब्जरेणुना।
अरुणाधरेण करुणाम्बुराशिना हरिणाहमस्मि गुरुणा सुरक्षितः।।
23. नवां मुदं दिशतु नवाम्बुदोपमोऽनवद्यसच्चरित नवावतारभाक्।
नवेतरोऽव्यभिनव सद्गुणोहरिर्नवैन्तवैर्दधिनवनीततस्करः।।

24. अपरिमित गुणान्पुरो मिमीते पुरुमहसः पुरुषोत्तमाख्यपुंसः।
कथमिह पुरुशाऽपरषोः परेत्परिमितधीः परमार्थतत्परोपि।।
25. जीयादानवनील नीरदरुचिर्देयादनादिर्हरिः
श्रेयोदानवमर्दनः कलिहरश्श्रीयादवानां पतिः।
पायादानतरक्षणक्षमपदो ज्यायो दशायै विभुः
भूयादागमवेद्यदिव्यचरितो भूयोदयावारिधिः।।
26. चयां दाक्ष्यंच दाक्षिण्यं क्षमां चाश्रितरक्षणात् ।
अब्जाक्ष! त्वयि संवीक्ष्य त्वामस्मि शरणं गतः।।
27. बलिनिकटगर्वपाटन पटुरपटुसुरेष्टदो वटुःकोऽपि।
हाटकपटपरिवेष्टित कटीतटो वसति सुभटबलिनिकटे।।
28. फणिपशय मणिममुख घृणिलसित वीर्यं
प्रणिहित सुभणिति नुतिमणि विदित चर्यम्।
पणितमतिगणित गुणमणिममरवर्यं
गुणिमघवमणि लसितघृणिमनममार्यम् ।।
व्याख्याः-पणितम्-अतिगणितगुणमणिम् – इति पदच्छेदः
29. विन्देयमेते अरविन्दनाभ पादारविन्दे हृदयारविन्दे ।
मन्देतरानन्दमरन्दमिष्ट मिलिन्दवृन्दाय चिरं ददाने ।।
30. कलाकुशल तल्लजोल्लसितवल्गु धम्मिल्लगा
समुल्लसित मल्लिकार्जुनवचः कलामल्लिका ।
प्रफुल्लनवमल्लिका सुममतल्लिकावासना-
मवेल्लितसुवेल्लितामपि हरेः किमूल्लासयेत्।।

व्याख्या

पूर्वम् अवेल्लिता-अचलिता-पश्चात्सुवेल्लिता सुचरिता-अवेल्लित सुवेल्लिता ।

पञ्चमो यथा

31. काव्यं भव्यकृदव्ययव्यवहृतिव्यासक्तदिव्यार्थकृत्
कुर्वे सर्वसुपर्वपूर्वक विकुर्वाणस्तु तस्याधुना ।
भ्राजिष्णो रतिधृष्णुजिष्णुविजयाद्यालङ्करिष्णो जग-
द्वर्तिष्णोः प्रभविष्णुविष्टपकृतो विष्णोस्सहिष्णोर्मुदे ।।
व्याख्या : विकुर्वाणैः- हृष्टमानसैः।

32. देवं निर्व्यसनं सुवर्णवननं धीरायिनं मायिनं
भास्वच्छक्रकरं सदा शुभकरं वैराग्यदं भाग्यदम्।
विष्णुं श्रीदयितं सुधाब्धिशयितं सल्लक्षणं स्वीक्षणं
सद्रक्षानिरतं भजाम्यनितरं दामोदरं सादरम्।।
व्याख्या : समीचीने ईक्षणे यस्य तं स्वीक्षणम्।

33. रमाकनककाञ्चिकाञ्चलविचञ्चलाञ्चन्मणी-
फणायितघृणिव्रजप्रसरणातिचित्रायितम्।
हरिद्वसनमादिमं सममदोहरिद्वाससा
वसान इह मानसे वसति वासुदेवो वशी।।

34. करुणाकरमरुणाधरमरुणास्तर वसतिं
शरणागत भरणोज्ज्वल चरणाम्बुज सरणिम्।
प्रणमाम्युरुगुणमादिम मणिमादिमकिरणं
कमलापतिममलेक्षण कमलाञ्चितमनिशम्।।

35. कृष्णः पुष्णातु धृष्णुस्त्रिभुवनभवनो भावनाभावनीयो
यःपाति स्वैर्महोभिर्महित महिततैर्माहितो मोहितं माम्।
राकायां द्वारकायां रुचिर रुचिपुर द्वारकायां स्विकायां
गोपो गोपीरगोपीत्सुसडसदिनः कामुकः कामुकीर्यः।।

व्याख्याः-मायाः लक्ष्म्याः हितः माहितः महितायां मह्यन्ततैस्त्वैः आत्मीयैः महोभिः तेजोभिः यः रेजे सुसदने सीदतीति सुसदनसत्, सः भावनीयः कृष्णःभावनाःपुष्णातु, शेषं सुगमा, स्विकायामिति अनुपपर्जसप्यस्वशब्दस्यात्मीयदाचित्वात् प्रत्यययास्थादित्यादिना नित्यमेवेत्वं – न तु भस्त्रैषेत्यादिना ।

षष्ठो यथा

36. विदातृ मधुमाधुरी धनधुरीण वाग्धोरणी-
विधावधि सुसेवितां विधृतधैर्य धीसाधिताम्।
सुधाब्धिदुहितुः सुखं विदधतीं धरन्तीं धरां
तनुं मधुविरोधिनो धरतिधीः कथं मेधमा।।

37. यथामति तथप्यमू रथकथञ्चिदस्येशितुः
हरेः कथयतः कथा मम वचो वृथास्यात्कथम्।
तथा हि कथनीयसत्प्रथितकीर्ति पाथोनिधेः
हरेः कथयतः कथा अकथयन् कथाज्ञाः प्रथाम् ।।

38. स्रष्टास्पष्ट विशिष्टविष्टप महासृष्टौ स्वदृष्ट्या हरिं
दिष्ट्यादिष्टवशान्निजेष्टघटकं दृष्ट्वैव शिष्टेष्टदम्।
सृष्टिर्व्यष्टिसमष्टिविष्टसभृता तेनानुशिष्टोऽमुना
निर्दिष्टामतनिष्टतुष्टमनसाचष्टापि चेष्टांहरेः।।

39. पूर्णानन्दममन्दसुन्दरतनुं दिव्येन्दिरासुन्दरी
नेत्रेन्दीवर मोददेन्दुवदनं गोविन्दमानन्दतः।
सान्द्रानन्दसनन्दनादिदयितं वृन्दारकैर्वन्दितं
नन्दानन्ददनन्दनं दिविषदां देवं मुकुन्दं नुमः।।

40. पूर्णस्स्वर्णपटः पयोर्णवशयश्चार्णोजधाम्नीप्रियो
नाभ्यर्णोरुह कर्णिकावसदजास्योद्गीर्ण गीर्वर्णितः ।
सम्पूर्णं मदुदीर्णवर्णनमसौ कर्णस्समाकर्णयन्
अभ्यर्णं मम तूर्णमेतु करुणार्णोधिस्सुपर्णध्वजः।।

41. अभङ्गरुचिसङ्गताङ्गिक रमाङ्गनासङ्गम-
प्रसङ्गहृदयङ्गमेङ्गिततरङ्गरङ्गेश मे।
अभङ्गुरगिरां गणं गरिम तुङ्ग गङ्गाझर-
न्वभङ्गभररिङ्गणं गुरुसुमङ्गलाङ्गीकुरु।।

सप्तमो यथा

42. नमद्वचो यद्यपि हृद्यमुद्यतं
तथापि चेद्विष्णुपरं सतुष्यति।
कुचेलनाम्ना मुनिना समर्पितै-
रियायमोदं पृथुलैर्नकिं स्वयम् ।।

अष्टमो यथा

तत्र सप्तमानुप्रासमिश्र-चतुर्थानुप्रासो यथा

43. कालिन्दीजलमुङ्मिलिन्द कुलपालि कालिमावलयः ।
मिलिता नलिनदलेक्षण कालिमकलयापि तौल्यमाप्तुमलम्।।

व्याख्याः- अत्र लकारावृत्तित्वाच्चतुर्थोनुप्रासः जलजलेति सप्तमोऽनुप्रासः।

44. श्रीकृष्णकरुणापूर्ण चरणार्णोजवर्णनम् ।
भवार्णवाभ्यर्णकर्णधार सद्गुणवर्णनम्।।

व्याख्याः- अत्र "र्ण"' कारावृत्त्या चतुर्थोनुप्रासः करुणा-चरणेति सप्तमोऽनुप्रासः।

तृतीयानुप्रासमिश्र – चतुर्थानुप्रासो यथा

45. मनसि ममापि मलीमसमषिका समतमसि वासुदेवोऽसौ ।
वसति सदा सकलमनस्सरसिज लसदमल विपुल तेजस्त्वात्।।

व्याख्याः-अत्र मकार- लकाराभ्यां तृतीयोनुप्रासः, सकारेण चतुर्थोऽनुप्रासः।

इति वृत्त्यनुप्रासाः

अथ छेकानुप्रासानामुदाहरणानि

प्रथमो यथा-

46. कारुण्यामृतपूर्णे पूर्णसुखेऽवति हरौ किमपरसुरैः ।
सुरनिम्नगावगाही गाहत इह न हिजदोपिकुल्याणि ।।

द्वितीयो यथा

47. सुरबृन्दं विधिपूर्वं पूर्वं स्तोत्रैस्समस्तु वद पूर्वैः ।
पूर्वासवस्य पूर्वा पूर्वामरपीडिताहरेऽवेति।।

तृतीयो यथा

48. सदा सदा नतपदो भगवान् नन्दनन्दनः।
दर्शं दर्शं मत्प्रणतीर्दद्याददय् शुभेपदौ।।

चतुर्थो यथा

49. राजराजादिनुत ते जगतीराज राजते ।
कीर्तिर्विराज राजीवनेत्र श्रीराजिराजितः।।

व्याख्याः-राजराजादिभिः= कुबेरादिभिः नुत जगती राजवरश्रेष्ठः अज! हे राजीवनेत्र! श्रीणाम्= सम्पदाम्= ज्ञान क्रियादि शक्ति सम्पदा मिति यावत् । राज्या राजितःते तव कीर्तिः–राजते।

पञ्चमो यथा

50. दिशि दिशि देवोदेवा धीशो धीशो हरिर्हरिद्वासाः।

वसतीत्यतीत्य भुविभवमहमिह जानेजने सखे! सौख्यात्।।

व्याख्याः- हे सखे! भुवि भवम् अतीत्य इह जनौ= जन्मनि, देवः = देवानामधीशः, धियाः ईशः, तस्या अप्यन्तर्यामित्वात्, हरिद्वासाः हरिः दिशि दिशि वसतीति- अहं सौख्यात् जाने ।

51. नन्द नन्दन धीर धीरित संस्तुतिस्तुतमापतेः

बोध बोधक सार सारस हस्त! हस्तिवरेण्यप!

शालिशील मपीश पेशल भक्त भक्तिमपि द्रुतं

देहि देहिप! देवदेव! शुभानिभानमिहात्मनः।।

व्याख्याः- धीराणां धीभिः ईरिताभिः संस्तुतिभिः स्तुतपेशलाः दक्षाश्च ते भक्ताश्च तेषां भक्तिरिव भक्तिः ताम्।

षष्ठो यथा

52. वादेव देवदेवादे! वादिवादवदावद ।

वद वेदं वेदवेदिन्! वेदौ वेदविदोऽवदन्।।

व्याख्याः- देवदेवानाम्-आदे-अथवा-देवदेव - आदे इति पदच्छेदः वादिनां वादेषु वदानद,वेदवेदिन्! श्रीविष्णो! इति प्रकरणाल्लभ्यते । त्वं वादे–अव-रक्ष वेदं वदेति वेदौ-परिष्कृतायां भूम्यां वेदविदः अवदन्।

53. धाराधरच्छ विधुरन्धर धैर्यधुर्य

विष्णो धराधर धरेश धराधराद्य ।

धीराधिराडिव मया त्वयि धीरधारि

धीराधरेण धुरिधीर धरामराणाम्।।

व्याख्याः- धरा धरधर ईश- धराधर आद्य इति पद विभागः । धीरधारीत्यत्रधीः-अधारीति पद विभागः।

सप्तमो यथा

54. नौम्ययोध्या धामधाम धामाधिपकुलोद्भवम्।

रामाभिदं नव्यमेघश्याममानन्द सिद्धये।।

अष्टमो यथा

तत्र प्रथमानुप्रासमिश्र - तृतीयानुप्रासो यथा

55. देवो दिवा निशिच रक्षतु लोकपाल

पाल स्स मे मुदमुदञ्चयतान्मुकुन्दः ।

कन्दर्पकोटि रुचिरश्चिरमस्तु मत्या

मत्यादरेण स हरिर्हरिनीलनील।।

तृतीयानुप्रासमिश्र-चतुर्थानुप्रासो यथा

56. वासो वसान! पीतं, वसुवासोऽन्नादिदानदानादे ।

वन वन मुदा मदीये, हृदि लक्ष्मीवास !वासुदेव! हरे।।

व्याख्याः- अनादे-इति पृथक्पदम्।

57. अष्टौ विभेदास्स्युर्वृत्तिच्छेकानुप्रासयोः पृथक् ।

इति सङ्क्षेपतः प्रोक्ता भेदा विष्णोर्मुदे मया।।

अथवृत्त्यनुप्रासश्छेकानुप्रासश्च

58. दलितधनुजचक्रं चक्रविध्वस्तनक्रं

रुचिजितदिनरत्नं रत्नमीशाञ्चिरत्नम्।

कलय कलितलीलं लीलया लोलबालं

हृदि कृतहितरङ्गं रङ्गराजं सदङ्गम् ।।

59. सरयूसरितिसराम सारस सरविनर सुरुचिरोरस्कः ।

सस्नौभासुर सुरुचा तस्य तदा सारसूरजा साम्यम् ।।

व्याख्याः-सासरयूःसूरजासाम्यं = कालिन्दीसाम्यम्, आर= प्राप।

60. राभाऽऽराधन राध साधनचयैस्सत्याधनाराधय-

द्भामा भाऽमलकायकोमल कलाकालोत्पलैरार्हयत् ।

भैष्मी भीष्मविलक्षणैस्तवशतैस्सल्लक्षणैरस्तुवत्

कृष्णं कृष्ण ! विभो! विभासितममुं कल्येपि कल्याणदे।।

व्याख्याः- भाऽअमलकायच - सा - कोमलकलाचेति - विशेषणोभयपदः, भामा-सत्यभामा कालोत्पलैः-नीलोत्पलैः।

अथ लाटानुप्रासः

61. रूपं रूपं मुकुन्दस्य तस्येशस्य गुणागुणाः।

कथाः कथा हरेस्तस्य ज्ञानं ज्ञनंच तद्विदाम्।।

श्री परमेश्वर चरणा
र्णोजासक्तेन मल्लिकार्जुन नाम्ना ।
श्री गुरुकृपया रचितः
प्रथमः पादोऽद्य वासुदावानन्दे।।

इति श्री वासुदेवानन्दे अनुप्रास चित्रपादः प्रथमः

श्री वासुदेवानन्दे - द्वितीयपादप्रारम्भः

अथ यमकलक्षणम् - तद्भेदाश्च

1. आवृत्तिर्वर्णसन्दोहगोचरा यमकं भवेत् ।
संक्षेपाद्विंशतिविधं तत्स्यादित्यवगम्यताम् ।।

2. प्रथमं स्यात्पादसन्धिगतं चापि पृथग्विधम् ।
द्वितीयं स्यात्पादसन्धिगतं चाप्यपृथग्विधम् ।।

3. तृतीयं स्यात्पादसन्धिगतं चाप्येकदेशकम् ।
चतुर्थं स्यादव्यपेतमनेकस्थलगं च तत्।।

4. पञ्चमं स्यादव्यपेतं पूर्णं चापीति कथ्यते ।
षष्ठं भवेदव्यपेतमेकदेशगतं च तत्।।

5. सप्तमं स्याद्व्यपेतं चाप्यनेकस्थलगं च तत् ।
अष्टमं स्याद्व्यपेतं च पूर्णं चापीह कथ्यते।।

6. नवमं स्याद्व्यपेतं चाप्येकदेशगतं च तत् ।
दशमं स्यादव्यपेतव्यपेतं च पृथग्विधम् ।।

7. आपूर्णमेकादशगं त्यव्यपेतव्यपेतगम् ।
भवेदपूर्णमपृथग्विधं च द्वादशं तथा।।

8. अव्यपेतव्यपेतं च पूर्णं च स्यात्पृथग्विधम् ।
त्रयोदशं त्यव्यपेत व्यपेतं चा पृथग्विधम् ।।

9. पूर्णं चापि भवेदेव चतुर्दशमथोच्यते ।

अव्यपेतव्यपेतं चाप्येकदेशगतं च तत् ।।

10. पादाभ्यासः पञ्चदशमर्थाभ्यासस्तु षोडशम् ।

एकाकारत्रिपादं तु स्यात्सप्तदशकं तथा ।।

11. एकाकारचतुष्पादं त्वष्टादशमितीर्यते ।

प्रतिलोमं तूनविंशं विंशं स्यान्मिश्रलक्षणम् ।।

12. स्वीयपादस्थ वर्णौघ स्यावृत्तावव्यपेतकम् ।

भिन्नपादस्थ वर्णौघ स्यावृत्तौतु व्यपेतकम्।।

13. यदव्यपेतयमकव्यपेतयमकात्मकम् ।

अव्यपेतव्यपेतं तदिति शास्त्रविदो विदुः ।।

14. चतुर्ष्वपिच पादेषु सत्यष्टादशवर्णगे ।

पादवर्णार्थोत्तरगं पूर्णमन्यदपूर्णकम् ।।

व्याख्याः– पादवर्णार्थोlmरगम् इति – पादवर्ण संख्यार्थोत्तर-संख्याक वर्णगतमित्यर्थः।

15. पादे पादेऽथवा पादभेदे यत्तुविभिद्यते ।

पृथग्विधं त्वद्विज्ञेयं ततोऽन्यदपृथग्विधम् ।।

एतेषामुदाहरणानि

प्रथमं यथा

1. महोदयाद्याश्शिवतावयःकुले
 वयः कुलेड्यानमुपासकाशये ।
 सकाशयेवस्थितिरीदृशागुणा
 दृशागुणा इत्यवृणोद्रमाहरिम् ।।

व्याख्याः

महोदयोद्याः= तेजःकृपाद्याः, शिवताच-वयश्च कुलञ्च वयःकुले, वयसां पक्षिणां कुलस्य-ईट्-प्रभुः,गरुत्मान्, तद्यानञ्च, उपासकानाम् आशये-अभिप्राये, सकाशे एव स्थितिश्च, ईदृशाः गुणाः दृशा = दृष्ट्या-पर्यालोचनेनेत्यर्थः गुणाःइति मत्वा, रमा = लक्ष्मीः हरिम् - अवृणोत् ।

2. स्तुतश्च मद्वचश्शुभं करोति यस्सदैव सत्
 करोति यस्सदैव सज्जनावनन्तमादिमम् ।
 जनावनन्तमादिमङ्गळं कलापमस्तुव -
 ङ्गळा कलापमस्तु वस्तुतश्च मद्वचश्शुभम् ।।

व्याख्याः

यः स्तुतश्च मद्वचश्शुभम् - यथास्यात्तथा करोति, यः – सदैव - सततमेव – सत् - सत्यं ज्ञानमिति श्रुति प्रतिपादितं सत्यवस्त्वित्यर्थः,यः – दैवेन – भागधेयेन - सदा वर्तन्त इति सदैवाः तेच सज्जनाश्च सदैवसज्जनाः तेषामवनं करोति- दुर्जना न प्यवति-पूर्वसुकृत बलेन। पूर्वसुकृतरहितानपि- सज्जनानवति निजभक्तिमाहात्म्येनेतिभावः, तमादिमम्, अनन्तम्। आदि

मङ्गलायाः- लक्ष्म्याः- कलाः पातीति, तम् आदिमङ्गला कलापं जनौ-जन्मनि – अहमस्तुवं - शुभम्। मद्वचः – गलस्य – आसमन्तात्कलापः – भूषणं – तत्सदृशमिति यावत् - यथा भवति तथा। कलापम्-वस्तुतश्च, चशब्दादवस्तुतश्च - अस्तु ।।

द्वितीयं यथा

3. गुरुवाक्यसौरभवता भवतापहराच्युताङ्घ्रिला भवता ।
भवता शुभं शुभवता भवतान्मे वासुदेवभक्तगणाः ।।

4. सदात्मन्चिदात्मन्सुखात्मन्परात्मन्
वरं कृष्णगोविन्द याचेऽष्टदार ।
दयाचेष्टदारङ्गराजस्य विष्णो-
स्तवास्त्वीश दीने मयित्वं नियोज्ये ।।

चतुर्थं यथा

5. ज्ञानतोऽज्ञानतो वापि वासुदेवासुरेश्वर ।
धीमतो धीमतो ऽसित्वं समया समयास्तुतः ।।

व्याख्याः

असुरप्राणद - हे – वासुदेव - धीमतः - पण्डितस्य - धीमतः - धीसम्मतः सः त्वं-समया-निकषा-मया-स्तुतोसि ।

6. सरुचिराय चिराय सुराहरे
परपदेन पदेनतिमादधुः ।
अमर भास्वरभा स्वबलेन खं
खलु सतार सतारमिति प्रथाम् ।।

व्याख्याः-

परपदेन परमपदप्रभो! हे हरे-सुरुचिराय-तवैवेत्यर्थः, पदे-पादाय-सुराः-चिराय-नतिम्-आदधुः सता-समीचीनेन-अमराणां सम्बन्धिनां - भास्वरभानां - धीप्रत्विषां स्वबलेन – खं – सतारां -नक्षत्रसहितमिति प्रथाम्-आर-प्रापखल्वित्युत्प्रेक्षा ।

7. पुरुभूधिषणो धिषणोनृहरेः
पदतामरसेऽमरसेव्यपदः ।
निपपात मुदा तमुदारगुण
स्सगुरुं स्वकृतस्वकृतत्रिदिवे ।।

व्याख्याः

पुरुभूधिषणः - बहुबुद्धिः–धिषणःगीष्पतिः –अमरसेव्य पदः-नृहरेः पदतामरसे-निपपात ।

8. कमलेश पादकमले तवाश्रित
स्समुदानतालि समुदाय आप्तवान्।
मधुराख्य मुक्ति मधुराजदञ्जसा
शमले शतोऽपि शमले पतन्नपि ।।

व्याख्याः

मधुरा आख्या यस्य – तस्य सम्बुद्धिः – हे कमलेश – तव पादकमले-आश्रितः समुत्–आनतालिसमुदायः - शमलेशतोऽपि शमलेपतन्नपि–राजत्– मुक्तिमधु-अञ्जसा-आप्तवानित्यर्थः।

9. जगत्पतेऽभवंपुरा भवेभवे भवेभवे ।
हरौ त्वयि क्रमेण धीरधीरधीरधीरधीः।।

व्याख्याः

भवे भवे–अभवे–अभवे–धीरधीः–अधीरधीः - अधीः इति-पदच्छेदः पुराभवेभवे-पूर्वस्मिन् जन्मनिजन्मनि धीरस्य धीरिवधीः यस्य सः

धीरधीः – अभवे – मोक्षे – अधीरस्य धीरिवधीः यस्य सः अधीरधीः न विद्यते भवः संसारो यस्य तस्मिन्नभवे – हरौ त्वयि, नविद्यते धीः यस्य सः अधीः अभवमिति लङ् ।

पञ्चमम् यथा

10. रुचिरमापरमाप रमाजतिं
    यमुरुचारु रुचारु रुचारुदृक् ।
    विगमनन्त मनन्त मनन्त शा
    यिनमुदारमुदारमुदारमम् ।।

व्याख्याः

उरुश्च सा चारुश्च - उरुचारुः, रुचा – कान्तिः यस्यास्सा उरुचारुरुचा, रुरुचारुदृक् - कृष्णसाररम्यदृक्, परमा श्रेष्ठा – रमा – लक्ष्मीः - रुचिरं – यं सतिम् – आप-प्राप, तं वि गमनं गरुडगमनं-यद्यपि विशब्दः पक्षिसामान्यवाचकः - तथापि, गरुत्मतो मुख्यत्वात्–प्रकृतानुरोधाच्च स हि गृह्यते, न विद्यते – अन्तो नाशो-यस्य - तम् - अनन्तम् - अनन्तशायिनं - शेषशायिनम्, उदारं - दातारम्-उदारमुदा – महासन्तोषेण अहम् – अरमं - समन्तादरमम् - आङ् पूर्वक -रमुधातोर्व्याङ्पभोरम इति परस्मैपदम् ।

11. विभा विभा विभा विभा विभा विभा विभा विभा
    स्यपास्य पास्यपास्यपा स्यपास्यपास्यपा स्यपात् ।
    रसारसा रसारसा रसारसा रसारसा
    नते नते नते नते नते नते नते नते ।।

पदविभागः-विभा-विभा विभ अविभा विभ, आविभावि– भाविभा– असि–अपास्य–पास्यपास्य-पासि-अपास्यपास्यपास्यपात् - रसारसा –रसारसा–रसारस–अर–सा–रसा–नत–इन–ते–नतेनते नतेन तेनतेन -ते।

व्याख्याः-

विभया कान्त्या - विशेषतो भातीति तस्य सम्बुध्दिः, विभाविभ - अतश्चोपसर्ग इतिकः, आसमन्तात्-विभावः– प्रभावः - अस्याः अस्तीति – आविभाविनी – आविभावनीभा - दीप्तिः यस्य – तस्य सम्बुध्दिः आविभाविभ- श्रीविष्णो इति प्रकरणाल्लभ्यते-अवौ-सूर्येभावः – अस्तिता - अस्याः अस्तीति अविभाविनी -अविभाविनीच-साभाविनी भविष्यत्कालीनाच–अवि भाविभाविनी- आविभाविभाविनीच सा भा – चेतनात्मक परमात्म स्वरूपञ्च – अविभाविभाविभा – असि - भाशब्दस्यायमर्थो- मुण्डक श्रुतौ - तमेतभान्त मनुभाति सर्व मित्यत्रोपपादितः - ननु-सूर्यस्य चेतनात्मक परब्रह्म स्वरूपावस्थान लक्षण जीवन्मुक्तेरिदानीमेव सम्प्रप्तत्वात्- किमेवमुच्यते - भाविनीभेति। अधतत ऊर्ध्व उदेत्यनैवोदेता - नान्यमेतैकलएद मध्ये स्थात्येति-श्रुतौ-सूर्यस्य इदानीमेव जीवन्मुक्ति रग्रे विदेहमुक्तिश्चोपपादिता – तस्मादुक्त मसङ्गतमिति भवत्या शङ्का - तां निराकुर्मः।

यद्यपि चेतनात्मकपरमात्मस्वरूपावस्थानलक्षण जीवन्मुक्तिः – सूर्येणेदानीमेव सम्प्राप्ता - तथापि सोपाधिक स्वरूपावस्थानं सम्प्राप्तं – सोपाधिकस्वरूपस्य ज्ञातत्वात् न चैतावता निर्गुणज्ञानाभावनिर्गुणस्वरूपावस्थानयोः प्रसङ्गः निर्गुणमेव ब्रह्म मायोपाधिकं ज्ञातं तद्रूपे अवस्थितंच - तर्हि अपरं ब्रह्मैवावगतं – न तु परम्ब्रह्म् – तथा सति जीवन्मुक्त्यभावप्रसङ्गः नेति ब्रूमः। मायोपाधिकमपि ब्रह्मपरमेव भवितुमर्हति। मायाकार्येपाधिकं त्वपरमिति वेदान्त

सिद्धान्तः सिद्धान्तः स्पष्टं भेदम्। अदृश्यत्वादि गुणको धर्मोक्तेः नचकार्ये प्रतिपत्त्यभिसन्धिरिति। सूत्रद्वय तद्भाष्य तट्टीकासु- वेदान्त पञ्चदश्याञ्च – नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेह कैवल्यमुपाधेर - निवारणादिति शिवम्। अपास्य - शसयोरभेदः आपाश्यपाशानां समूहः–पाश्या-कर्मपाशानां समूह इत्यर्थः न विद्यते पाश्या यस्य तस्य सम्बुध्दिः अपाश्य पास्यपास्य शसयोरभेदः-पाश्यपाश्य-पाशी = वरुणः पाशानां समूहः शाश्या-न विद्यते पाश्याः यस्य सः इन्द्रादिः पाशीचासौ अपाश्यश्च – तस्य सम्बुध्दिः पाश्यपाश्य वरुणेन्द्रादि देवात्मक - अपाशितुं योग्या - अपाश्या पाश्यानाशसमूहः कर्मपाशसमूह इत्यर्थः एषां तान् पातीति अपाश्यपाश्यपः, आस्यं च पात्- पादश्च अस्यपादित्येकवद्भावः आन्यपादावयवोक्ति स्सर्वाङ्गोपलक्षणार्था अपाश्यपास्यवः। आस्यपात् यस्य तस्य सम्बुध्दिः अपाश्यपास्य पाश्यपात् ।

रसारः - चूतः तस्य फलं रसारं – फले लुगितिसूत्रात् तस्य सारः रसारसारः। सारसस्य-कमलस्य-आसमन्ताद्रसाः सारसारसाः – कमल रसोक्त्या पुष्परसाख्यो मकरन्दोभिहितः - रसारसारस्च – सारसारसाश्च - रसारसारसारसारसाः ते इव आसमन्ताद्रसाः गुणाः यस्य तस्य सम्बुध्दिः रसा रसा रसा रसा रसा रस - नत- नमस्कृत, इन प्रभो- श्रीविष्णो पासि इति ज्ञात्वेतिशेषः - इति ज्ञात्वा विशेषा भा यस्यास्सा – विभा – सारसा – भूदेवी - तव नते नते-नमस्कृतौ नमस्कृतौ- तेनतेन- नतेन नमस्कृतिधातेत्वां कर्मणि षष्ठी - अर प्राप ।

षष्ठं यथा

12. कुमुदवनरत हृदय कुमुद वनजाक्ष
भ्रमरवर लसदसित रुचि परिचिताङ्ग।
सकलजगदधिप जय जलजमुख नित्यं
लसदमल सुगुणमणि सरिदधिप विष्णो ।।

सप्तमं यथा

13. कमलाभर्तुश्चित्तं तोषयितुं प्रायशस्तदिवसमणिः
कमलाभहृदयगोभूत्कौस्तुभनामा प्रशस्त दिवसमणिः ।।

व्याख्या: प्रायशः – तत् – इव - नः मणिः इति पदविभागः प्रशस्तदिवसमणिरिति प्रशस्त दिनमणिसादृश्य विशिष्ट इत्यर्थः। तच्चित्तं – तोषयितुमिवेत्यन्वयः ।

14. विष्णोःपरस्मात् बहुलाभयादे
र्मोक्षस्य यस्माद्बहुलाभयादेः ।
तस्माद्गुणौघैस्सहितो वदान्यः
कस्स्याद्गुरुर्दासहितो वदान्यः ।।

व्याख्याः- यस्मात् परस्मात्- आदेः- विष्णोः बहुला-भयानाम् आदेः मोक्षस्य बहुलाभः-तस्मात् गुणौघैस्सहितः वदान्यः-दासहितः -अन्यः-गुरुः-कस्मात्-वदेत्यन्वयः नकोपीति तात्पर्यम्।

15. नमस्यामो दामोदरमनघमीशं मम वशं
यशोदानन्दा सस्तुतगुणमणिस्सप्रदिशतात् ।
नमस्यामोदाय प्रभवति सदा यस्य गुणिनो
यशोदानन्दायावतरणमभूद्यस्य धरणौ ।।

व्याख्याः- नमस्या-मोदायेति पदविभागः नमस्या-पूजा ।

16. महतीं गृणाति भवदीयकथां

महती समञ्चित विपञ्चिकया

महती रगस्सुरमुनिस्सरसौ

महतीड्य मङ्गल गणेश हरे ।।

व्याख्याः- न विद्यते हतिः एषां ते, अहतयः - ईड्याः मङ्गल गुणाः यस्य – तस्य सम्बुध्दिः–अहतीड्यमङ्गलगुण-महतीरगः उत्सवपारगः-महतीवसमञ्चितेत्यत्र नारदविपञ्चिकायाः-महतीति प्रसिद्ध नाम बोध्यम् ।

17. रामो वेङ्कटनायकोद्य यदुपादेयाद्यमापादितम्

भक्त्याचेक्षणयो स्वरूपमतुलं देयाद्यमापादितम् ।

इत्थं प्रार्थयता चिदाख्यमनुपादेयाद्यमापादितं

लाभं वर्णय विष्णुभक्त विबुधा देयाद्यमापादितम् ।।

व्याख्याः- यत्-उपादेयेषु-ग्राह्येषु-आद्यं-भक्त्या आपादितं सम्पादितं-च - यमेनेति - नियमादीनामप्युपनक्षणं - यम नियमादिकेन –सम्प्रज्ञात समाध्यन्तेन-योगेन आपादितं च अतुलं तत्स्वरूपं-ईक्षणयोः - देयात् ईक्षणोपादेयाद्यशब्दाभ्यां समूर्तिकं स्वरूपं-प्रतिपादितं- इत्थं प्रार्थयता-पुरुषेण-अमपादेयम् अग्राह्यं च तत् आद्यंच-चिदाख्यं स्वरुपं- निर्गुणं स्वरूपमत्यर्थः – अपादि – हे विष्णुभक्त- विबुधादे, अयेषु-शुभावह विधिषु - आद्याती-तत्प्रदाने- प्रधसूत् यद्वा- आदौ कीर्तनीयादित्यर्थः – मापात् - लक्ष्मीपतेः इतं प्राप्तं-तं-लाभं-वर्णय ।

अष्टमं य़था

18. भाव्यजनामोदक वद

    भाव्यजना मोदकवदुपासक वदनम् ।
    भाव्यजना मोदकवद
    भाव्यदनामोदकवदुदित पद्ममिति ।।

पदविभागः भाव्यजनामोदक-वद - भाव्यजनामोदकवत् - उपासक वदनं – भावि -अजनामोदकवत् – अभावि अज - नाम उदकवदुदितपद्मं – इति।

व्याख्याः- भाव्यान् जनानामोदयतीति तस्य सम्बुध्दिः- भाव्यजनामोदक-हे-अज-श्रीहरे! भामच्चतत् व्यजनं चेति गन्ध व्दिप इत्यादि वत्समासः–तस्य – आमोदकः - परिमळः अस्मिन्नस्तीति – भाव्यजनामोदकवत्- विष्णुसेवा- पराणां निज हस्त गीत तालवृन्तक सम्बन्धि परिमल मिलित वदनयुक्तत्वं – युक्तमेवेत्यभिप्रायः – अजस्य - श्रीविष्णोः नामान्यभिधानान्येव- उदकानि तानि–अस्मिन् सन्तीति - अजनामोदकवत्। उपासकवदनम् – उदकवति – सरो- वरादावित्यनुसन्धेयं नतुकूपादाविति। तत्रैव पद्मस्योत्पत्तेः- उदितञ्च तत् पद्मं च-उदकवदुदितपद्मम्-इति भावि–उत- अभाविनामवद।

नवमं यथा

19. हरिदास त्वत्परिवृढ ।

    नुति लसदामोद रोमाञ्च
    भक्तस्तुतितुष्टस्त्वा
    मवति सदामोद रोमाञ्च ।।

दशमं यथा

20. परम परमसित्वं ब्रह्मसच्चित्सुखाख्यं

परम परमसित्वं माययैनेति विष्णो ।

मधुर मधुरसश्री गर्वसर्वंकषाभिः

मधुर मधुर बुद्धिस्त्वां बुधो वक्ति वाग्भिः ।।

व्याख्याः- परम - उत्कृष्ट-हे विष्णो त्वं सच्चित्सुभाख्यं परं केवलं-माययैव-अपरं ब्रह्मासि-इति-मधुरायाः मधुरसश्रियः-गर्वस्य-सर्वंकषं-अतएव मधुरं नविद्यते धुरा-भारः यस्यास्सा-अधुरा – बुद्धिः – यस्य – सः - अधुरबुद्धिः बुधः - त्वां वाग्भिः व्यक्तीत्यन्वयः ।

21. माधवी माधवीं स्वादुतां चेद्व्रजे

माधवीयाख्विया साम्यमीषद्व्रजेत् ।

माधुरीशस्य यां श्लाघितुं नाशकन्

माधुरी माधुरीणैः प्रसारेद्गिराम् ।।

व्याख्या:-माधवी-वासन्ती-माधवीं-मधुनिभवां-स्वादुतां व्रजेच्चेत् -माधवस्य विष्णोः सम्बन्धिन्या माधवीयया-आख्यया-साम्यम्-ईषद्व्रजेत्-याम्-आख्यां मा-लक्ष्मीः ईशस्य-पत्युः – धुरि – अग्रे – माधुर्याःमा – सम्पत् - तयाधुरीणैः-गिरां-प्रसारैः श्लाघितं नाशकत्।

एकादशं यथा

22. श्रीसारसाक्षसारज्ञ! संसार इहसारवान् ।

श्रीसारस्वतसारश्चेत्संसारि यशसारतः ।।

23. धरा धरा धरा धरा । पते त्वया सदधृताः ।
धरा धरा धरा धरा । धृते पुनश्च किं यशः ।।

व्याख्याः- हे धरापते-धराधराः पर्वताः-धरा-भूमिश्च-त्वया इमे सदा दताः पुनश्च-धराधराणां पर्वतानां मध्ये–अधराधरस्य– अतिनकृष्टस्य-गोवर्धनाख्य पर्वतस्येति भावः आधृतेः-
समन्ताद्धारणात् - किंयशः

24. सकलश्रुत विश्रुत सद्गुण मी
दृश मादृश मादृश मादृशमा ।
कलये न्नृहरे परिपालय ने
दृसमा दृशमा दृशमा दृशमा ।।

व्याख्याः- सकलश्रुतविश्रुतसद्गुणम्- ईदृशं-आदृशमादृशं-आदृशं-आकलयन्-नृहरे-परिपालय-ना -ईदृश मादृशं – आदृशं - आदृशं- आ-इतिपदानी। ईदृशं – एतादृशं–आसमन्तात् - दृशा-दृष्टिः यस्य सः आदृशः-सर्वदृगित्यर्थः-सचासौ-मादृक्-लक्षीदृक्च-तम् आदृशमादृशं -त्वामित्यर्थः-आसमन्तात्-पश्यतीति-तम् आदृशं-ईदृश मादृशम्-एतादृश मादृशं आ-समन्तात् परिपालय । किं कुर्वन्सन् इति चेत्-आदृशं समन्तात् कलयन्-सन् ।

25. पद्मानायक मां पतन्तमथ ते पा देवतादेवता
धीशित्रा भवता पशुत्वमथवा भूदेवता देवता ।
कावा मे ध्रियतां नवेति वदतो वादेवतादेवता
मुक्तिं पण्डित मल्लिकार्जुनकवेः- श्रीदेवतादेवता ।।

व्याख्याः- अथ हे पद्मानायक ते-तव-पादे-पतन्तं -माम् –अवता – रक्षता – देवतानाम् -अधीशित्रा-भवता-त्वयेत्यर्थः।

पशुत्वम् अथवा-भूदेवता-ब्राह्मणत्वं-अथवा-देवता-देवत्वं कावा-मे – मम – ध्रियतां – नवाध्रियतां - धृञः कर्मणियकि भावकर्मणोरित्यात्मनेपदे - रिङ्यशग्लिङक्ष्विति रिङि रूपं इतिवादे – संवादे - वदतः उक्तवतः पण्डित मल्लिकार्जुनकवेः ममैवेत्यर्थः । ताम् उक्तिं – श्रीदेवतायाः - लक्ष्मीदेव्याः देवता-विष्णुरित्यर्थः - अवतादेव ।

यमकपादो द्वितीयः

द्वादशं यथा

26. हरे सवसुदेवभूस्सवसुदेवभूयामृत
प्रदस्सवसुदेवभूस्सवसुदेव भूश्चासिमे ।
मतौ वसनमन्नतो वसनमन्नतोहं भजे
हरिद्वसनमन्नतो वसनमस्नतोयं दिश ।

व्याख्याः- हरे – सवेषु - यज्ञेषु सदेवेषुच-भवत्यस्तीति-तथोक्त वसुना-धनेनच-देवभूयेन-देवत्वेनच-सहवर्तत इति सवसु देवभूयं, सवसु देवभूयंद तत्-अमृतं मुक्तिंच प्रददातीति तथोक्तः-धनदो-देवत्वदो मोक्षदश्चेत्यभिप्रायः वसुभिः अष्टवसुभिः देवैः-भुवा भूदेव्याच सहवर्तत इतिइत तथोक्तः सः - वसुदेवभूः वसुदेवात्मज श्चापि – मे – मम – मतौ – बुद्धौ – वस-नमद्भिः नतः नमस्कृतस्सन्-वस-अतः नमस्सन्-अहं-भजे-हे हरिद्वसन-मयानीतः – नमस्कृतस्सन् - वसनञ्च – अन्नञ्च - तोयञ्च अन्नतोयं दिश ।

त्रयोदशं यथा

27. श्रीरामराम नितराम सुरामाराद्वा
धारामराम मुखराम तरामभक्तिम् ।
श्रीरामरामतितरामभिराम पूजा
द्वारामराम नुसराम इरामनोज्ञाम् ।।

व्याख्या:-श्रीः-रामायस्य-तस्य सम्बुध्दिः श्रीराम-हेराम नितरां-असुरामराद्वाधारां-क्षीरवदमराम् - अमलां-रलयोरभेदात् – अमरां - मृतिरहिताम् - इरायाः भूम्याः – मनोज्ञां -तस्याश्च पवित्रत्वलाभात् - नविद्यते रामः एषांतेषामरामाणां - रामभक्तिहीनानामित्यर्थः – अत एव मुखराणां-दुर्मुखानां - अमलां रामभक्तिं - अभिराम - पूजाद्वारा - अतितराम् - अनुसरामः।

28. मधुराजित मधुराजितमधरीकृत विधस
न्मधुराजित मधुराजित विधिभाषितमधुना ।
मधुराजित मधुराजित रसि यस्य च सुकथा
मधुराजित मधुराजि परुचि सुन्दरमभजम् ।।

व्याख्याः- मधुरायां– मधुरापत्तने स्थितः अजितः – येनकेनापि – ग्रैः कैश्चिल्लक्षणैः–कथञ्चिदपि - कदाचिदपीत्यर्थः। तं मधुरा जितं-काशीपण्डित इत्यादाविव समासः। प्रयुक्तश्चाजित शब्दः- श्रीविष्णौ - जयजय जह्यजामजितेत्यवु - अयं च पङ्कजादिवद्योगरूढः इति प्रतीमः-धुराशब्दः आकारान्तः अधुरया-आभारेण। आनायासेनेति यावत् – जितं – भक्तैरित्यर्थः - उक्तञ्च श्रीविष्णुपुराणे - आयासस्स्मरणेकोस्य स्मृतो यच्छति

शोभनमिति-अधरीकृता-विधा यस्य तत् अधरीकृतविधं – सन्मधुनः – राजितमधुरम् -सन्मधुराजित मधुरम्- अधरीकृतविध सन्मधुराजित मधुरम्- अजितः - विधिः दैवम् – यस्यतत् - अजितविधि अधरीकृत विध सन्मधुराजित मधुरम् - अजितविधि भाषितम् - वचः यस्यतम् अजितरसि - युद्धवेगे जितः – मधुः - मधुनाम राक्षसः येनसः-यस्यचसुकथाः मधुराः – मधौ – चेते राजिताः- मधुराजिताः-ताश्चताः-मधुराजयः-पुष्परसराज्यश्च- मधुराजित मधुराजयः-ताः पिबन्तीति-मधुराजित मधुराजपाः मत्तमधुपा इति भावः– तेषां रुचिरिवरुचिस्तया सन्दरम्-अधुना-अभजम्।

श्लौ।। मालीनहृत्कवनमालीनहृत्कवनजामन्दसुन्दरवपु
र्मालीन हृत्कवनमालीनहृत्कवनजान्तः प्रकाश तवभोः ।
मालीनहृत्कवन मालीन हृत्कवन कृच्छ्रर्मणे भवतुगो
मालीनहृत्कवन मालीन हृत्कवन धिस्वप्नगच्युत मुदे।। 29

पदविभागः- मालीन हृत्कवन मालीन हृत्कवन जामन्द सुन्दर वपुर्मालीन हृत्कवनमालीन - हृत्कवनजान्तः प्रकाश – तव – भोः -मालीन हृत्कवन मालीनहृत्कवन कृच्छ्रर्मणे भवतु गोमालीन हृत्कवनम्-आलीन हृत्कवन स्वप्नक्- अच्युत-मुदे.

व्याख्या:- मालाः अस्यसन्तिति माली-व्रीह्यादिभ्यश्चेति इनिः - सचापादिनः पतिः – श्रीविष्णुश्च - मालीनः – तस्य हृदेव – हृदय मेव मालीनहृत्कम् – तद्वनमिव – मालीनहृत्कवनम् – तस्य – मा - लक्ष्मीः सम्पदिति यावत्। तस्याः लीनहृत्कवनजा अतिलग्न हृदयकमला च सा -

अमन्दसुन्दरवपुश्च सा – मा – लक्ष्मीदेवी च - तस्याम् लीनहृत्कःअतिसक्तहृदयश्चासौ-वनमालीचासौ- इनः प्रभुश्च -तस्य सम्बुध्दिः-अत्र इदेशब्देन लक्ष्मीदेव्याः प्रभुरितिच सर्वस्यापि प्रभुरिति चार्थो गृह्यते-सर्वप्रभुत्वम्-एष सर्वेश्वर इति माण्डूक्ये-हृत्कवनजस्य-हृदय कमलस्य-अन्तः प्रकाशो यस्य तस्य सम्बुध्दिः - हृदिह्येष आत्मेति प्रश्नोपनिषदि - आलीनमं हृत्कम् – हृदयम् - योगनिद्रयेत्यर्थः यस्यतस्यसंबुद्धिः – वनधौ – समुद्रे - क्षीरसमुद्र इत्यर्थः। स्वप्नक्- शयानः तस्य सम्बुद्धिः– भोः-अच्युत गोमालिनः अंशुमालिनः इने-प्रभौ सूर्यमण्डलमध्यवर्तित्वात्-सूर्यप्रभौ-त्वयीतिभावः। हृत्-हृदयम् यस्यतस्य ममेत्यर्थःकवनम् तवमुदेच-मा-लक्ष्मीः अलिः-भ्रमराम्बा तयोः इनौ–प्रभू- हरिहरौ श्रीशैल क्षेत्रवासी, श्रीभ्रमराम्बापतिश्शम्भुरित्येतत्सुप्रसिद्धम्। तयोः हृत् हृदयम्-एषां ते मालीनहृदः कवनमायां-कवितासम्पदिलीशं-हृत् हृदयम् एषांते-कवन मालीन हृदयः-मालीन हृदश्चते-कवनमालीन हृदश्च-मालीनहृत्कवनमालीन हृदयः – ते च ते – कवनकृतश्च – तेषां शर्मणे सुखाय च भवतु।

30. सारसारसिक सारसार मन
सारसारस विसारसार वचसारसार।
सारसारहसि सारसारमजसारसार
सारसार घनसारसार हृदसारसार।।

पदविभागः- सारसा-रसिक-सारसारमनसा-रसारसारसा रस विसारसार वचना–आरसा–आर–सारसा–रहसि–सा–रसा–आरम्-अजसारसार–सारसार–घनसारसारहृत्- आसारसार.

व्याख्या:- हेरसिक-अजसारः-श्रेष्ठः सारः बलम् यस्य तस्य सम्बुध्दिः-सारसार-सारसार-श्रेष्ठः श्रेष्ठः -घनसारः-कर्पूरः तस्य सारः स्थिरांश इव हृत्-हृदयम्-यस्यस्य सम्बुध्दिम् असारे आसारभूते-संसारादाविति भावः। सारसारभूत-श्रीविष्णो इति प्रकरणाल्लभ्यते-त्विमिति शेषः। आसमन्ताद्गुणैस्सह वर्तत इति-सारस-आसमन्तात् रसेन- अनुरागेन सहवर्तत इति सारस – सा – रसा – भूदेवी –सारम् - न्यारय्यं च तत् - सारम्-श्रेष्ठं च तत्-मनश्च-तेनेच-करणेन-रसारश्चूतः तस्यफलम् रसारम् फलेलुगिति- सूत्रात्-रसारञ्च सारसम्-कमलञ्च रसारसारसे–तयोः आसमन्ताद्रसाः तेषाम् विसारः – तस्य सारः स्थिरांश इव वचः तेनचकरणेन - कमलरसोक्त्या पुष्प रसाख्यो मकरन्दोऽभिहितः। अरसासती - रलयोरभेदः अलसासती रहसि – आरम् – द्दतम् – आर- प्राप ।

31. परमहितपरमहित परमहितबुद्धे
परमहित परमहित परमहिततात्मन्
परमहित परमहित परमहितदृग्भ्यां
परमहित परमहित परमहित पाहि।।

परमहितेषु-परममित्रेषु-परा-आसक्ता-किञ्च महिता किञ्च परमाबुद्धिः – यस्य तस्य सम्बुध्दिः पराः उत्कृष्टाः महिताः यस्य तस्य सम्बुध्दिः परम्-केवलम्-अहितानाम्-पर-शत्रो नीतुहिताना मित्यर्थः महयम् – ततःविस्त्यतः आत्मा यस्य तस्य सम्बुध्दिः। परमहिता-परमप्रिया–किञ्च परासक्ता - किञ्च महितान् पातीति महितपा-रमा लक्ष्मीः यस्य

तस्यसम्बुद्धिः। परमेषु – उत्कृष्टेषु - हितेषु – मित्रेषु च परश्रेष्ठ – महितानाम् - परमहित – परममित्र - श्रीविष्णो इत्यर्थाल्लभ्यते – हितदृग्भ्याम् - पाहे ।

चतुर्दशं यथा

32. वितनुते ऽतनुतेज उपेन्द्र ते
सुभजनं भजकाय जगत्पते ।
ननु कथं तनुते तनुतेज उ
ल्लसदुरुच्छविरीश भवान्यतः ।।

व्याख्याः- अतनुतेजः-महाप्रभावं वितनुते-ननु-तनु-सूक्ष्मं तेजः कथं तनुते- अत्र हेतुमाह-उल्लसदित्यादिना ।

पञ्चदशं यथा

33. रामा मध्ये कान्त योगं मनोभू
बाणाविद्धाः प्राप्यगोप्यो हरे ते ।
रामा मध्ये कान्त योगं मनोभू
मेशध्यात्वा मूर्तिमापेदिरेऽच्छम्।।

व्याख्या:- हे भूमेश भूमिरमापते मनोभूबाणाविद्धाः रामाः-गोप्यः-मध्ये-मार्गमध्ये-यावनमध्ये-अवलग्नेऽपीत्यर्थः-कान्तस्य कृष्णस्य-तवैवेत्यर्थः–योगम्–संयोगम्–प्राप्य–एकान्तयोगे– इति अध्येकान्तयोगम्,रहसि–समाध्यन्तयोगे त्वय्येव सिद्धेसतीति भावः-अयं विभक्तौ-अव्ययीभावसमासः रामाम् रमणीयाम्-ते-तव-तनुं-मूर्ति ध्यात्वा आच्छंमनः आपेजिरे।

षोडशं यथा

34. महोदयादिष्टवशाद्द्विजेभ्यः
महोदयादिष्टवशाद्द्विजेभ्यः ।
महावदाद्योवरद स्सदासो
महावदाद्योवरदस्सदासनः ।।

व्याख्याः- द्विजानाम्-इभ्यः ईश्वरः सदासः –दास सहितः- यः वरदः श्रीकाञ्चीक्षेत्रगत श्रीवरदराजः दिष्टवशात् दैवबलाच्च महान् उदयः- आविर्भावः यस्य तस्मात्-महोदयात्-इष्टबलाच्च- अप्रतिहतेच्छासामर्थ्यादित्येतत्तात्पर्यम्-द्विजेभ्यःविप्रेभ्यः महा- तेजःदयाः कृपाश्च – महौ - भूम्यम् अदात् - सः महावदानाम् – महावक्त्रृणाम् आद्यः - सदावरदः वरप्रदश्च ।

35. नम इदमस्तुते श्वरहरेव सुखेन भजे
वरकरुणानिधे हि तपसाध्वनि सन्दिशते।
वरकरुणानिधे हि तपसाध्वनि सन्दिशते
नम इदमस्तु तेश्वरहरेव सुखेन भजे ।।

व्याख्याः- स्तुत-ईश्वर-हरे-मयि-दमः-बाह्येन्द्रियनिग्रहः। न- हेसुख - आनन्दरूप इन – प्रभो -अव-रक्ष-भजे-वरकरुणाः-तपसा- निधेहि–ते–तव–अध्वनि मार्गे–शं दिश – हेवरकरुणानिधे –हितव– प्रियरक्षक–अनिशम्–साधु–दिशते–ते-तुभ्यम्इदंनमः - अस्तु- श्वः। अहरेव – सुखेन – अनायासेन - भजे उक्तश्च - श्रीविष्णुसेवायामनायासः श्रीविष्णु पुराणे आयासस्मरणे - कोऽस्य स्मृतो यच्छति शोभनमिति।

36. विगत तमसि वस्तु प्राज्ञमर्त्या भवेच्छं
वरममरविधीश स्थानयों बुद्धिमन्तः।
विगत तमसि वस्तु प्राज्ञ मर्त्याभवेच्छम्
वरममरविदीशस्थां नयों बुद्धिमन्तः।।

व्याख्या:- भोःविग-गरुडगमन प्राज्ञ-वरश्रेष्ठ, रविधियाः-सूर्यबुद्धेः ईशः। य आदित्ये तिष्ठन् इत्यादि श्रुत्या-सूर्यान्तर्यामित्यस्य प्रतिपादितत्वात्-मर्त्यानाम्-अभवे-मोक्षे-इच्छा यस्य-तत् - ततम्-विस्तृतम्-वस्तु-असि मम बुद्धिम् अन्तः – ओम् अङ्गीकुर्वित्यर्थः स्थाने-युक्त-मितिच भोः प्राज्ञ मर्त्याः - वः युष्माकन्तु-विगत तमसि अमराणाम्-विधेः ब्रह्मणश्च-ईशस्य विष्णोरित्यर्थः- स्थाने-वरम्-उत्तमम्-ओम्-प्रणवाख्यं शं सुखं भवेदिति च बुद्धिमन्तः वदन्तीति शेषः ।

सप्तदशम् यथा

37. सवयोगदादिमकरो विराट्तनू
परिगोविताच्छ्रित च यस्य केशवः ।
सवयोगदादिम करो विराट्तनू
सवयोगदादिमकरो विराट्तनूः ।।

व्याख्याः- सः-वयश्च-अगदः-अरोगश्च वयोऽगदौ- आदिमौ एषां तान् करोतीति तथोक्तः विराट्तनू परिगच्छतीति-तथोक्तः गदा-आदिमा-एषां ते गदादिमाः सवयसः सुहृदश्च ते गदादिमाश्च-सवयोगदादिमाः करेषु यस्य सः-विराट्तनूः विराट्–पञ्चीकृत महाभूत तत्कार्य

समष्टि स्थूल शरीरात्मकः पुरुष - तनूः- शरीरम् यस्य सः विराट्तनूः। सवः - यज्ञः-योगः परमात्मन्येक चित्तता तौ ददतीति सपयोगदाः आदिमा कराः - हस्ताः – यस्य सः अवेः सूर्यस्य - राट्- केशव - श्रितचयस्य-तनूः अवतात् ।

अष्टादशं यथा

38. सद्भूमेशो विदिस्थः कुवलययुगला भाविभापेक्षणश्रीः
सद्भूमेशो विदिस्थः कुवलययुगला भाविभापेक्षणश्रीः ।
सद्भूमेशो विदिस्थः कुवलययुगला भाविभापेक्षणश्रीः
सद्भूमेशो विदिस्थः कुवलययुगला भाविभापेक्षणश्रीः ।।

व्याख्याः-सत्-सत्यम् ज्ञानमनन्तम् ब्रह्मेति प्रतिपादितं सत्यवस्तु भूमा छान्दोग्ये – यत्रनान्यत्पश्यति - नान्यच्छृणोति नान्यद्विजानाति सभूमा इति प्रतिपादितम्-परिपूर्णपरब्रह्म्येत्यर्थः ईशः – विधौ - ब्रह्मणि तिष्ठतीति विधिस्थः तस्याप्यन्तर्यामी सन्नित्यर्थः कुवलययुगलवदाभात इति कुवलययुगळाभे–आविस्सूर्यश्च-भानि । आसमन्तात्भातीति भापश्चन्द्रश्च-तौ ईक्षणश्रियौ नेत्रसम्पदौ यस्य सः । सताम्-पण्डितानाम्-भूम्नः बाहुळ्यस्य ईशः-विधौ-विधाने तिष्ठतीति विधिस्थः। कुवलययुक् - कुच्छित वलययुक्तश्चासौ - न विद्यते लाभः यस्य सः - अलाभश्च-कुवलययुगललाभः-लळयोरभेदः। दरिद्र इत्यर्थः अत एव - न विद्यते विभा यस्य सः अविभः तं आसमन्तात्यातीति -आवौसुवलयाद्याभरणादि लाभं विभाञ्च-दत्येत्यर्थः-ईक्षणयोः श्रीर्यस्य सः। सताम्-सज्जनानाम् भुवः निवासभूम्याः मायाः सम्पदश्च-ईशः-यत्र सज्जनास्तिष्ठन्ति तत्प्रदेशे सम्पत्प्राप्ति कर्तेति भावः। विधौ दैवे तिष्ठतीति

विधिस्थः बहुभाग्यैर्लभ्यते विष्णुरिति भावः कौ-भूम्याम् स्थितः वलः-रलयोरभेदः वरः ययुः-अश्वमेधीयोऽश्वः यस्य सः कुवलययुः अश्वमेधयागकर्तेति-भावः। तं गच्छत इति-कुवलययुगे-लाभश्च-आसमन्ताद्विभा कान्तिश्च लाभाविभे-कुवलययुगे च ते लाभा विभे च तथोक्ते पातीति कुवलयलाभा विभा - ईक्षश्रीर्यस्य सः। कुवलययुगलेन कुमुद द्वन्द्वेन तावन्मात्र – समर्पणेनेति भावः। पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति - तदहं भक्त्युपहृतमश्नामि प्रयतात्मन इति श्रीमद्भगवद्गीतासूक्तत्वात् । आसमन्ताद्भविनी च सा-भा-दीप्तिश्च ताम् पातीति- कुवलययुगलाभाविभापा-ईक्षणश्रीः यस्य सः सद्भूमेशः इदं विशेष्यं समीचेन भूमि-रमादेवता पतिरित्यर्थः। विधौ विधाने तिष्ठतीति विधिस्थः – न विधिस्थः अविधिस्थः - एतदुपपाद्यते-सर्वोपि विधिर्भावनाविषय इति-किल। मन्यन्ते पौर्वमीमांसिकाः कथमिति चेत् "अग्निहोत्रम् जुहुयादि" त्यादि – विधिवाक्ये हि यद्यप्युत्पत्ति मात्रम् श्रूयते-तथाप्यधिकार विनियोग – प्रयोगास्तु - वाक्यान्तराल्लब्धव्यापिन-अधिकार विनियोग प्रयोगोत्पत्ति रूपाणां परस्पराविनाभावात् – एते चाधिकारादयो भावनयैव किल स्वीकर्तव्याः – स्वीकृतेष्वेव तेषु - किल। विधिस्सम्भवति तस्मात्सर्वोपि विधिर्भावना विषयः । एतादृशो विधिस्सिद्धे ब्रह्मवस्तुनि न सम्भवतीति हृदये मन्यमानाः श्रीशङ्कर भगवत्पादाचार्याः तत्तु समन्वयादिति-सूत्रस्य प्रतीकायाम् न च परिनिष्ठिते वस्तुस्वरूपे विधिस्सम्भवति-क्रिया विषयत्वाद्विधेरित्यूचिरे। तस्मादविधिस्थः ज्ञानगम्यत्वादिति शिवम् । पूर्वविधौ-विधाने तिष्ठतीति विधिस्थ इत्युक्तम् - तत्तु ज्ञानद्वारा विधेर्विष्णुप्राप्तिहेतुत्वादुक्तमित्यदोषः।

एकोनविंशं यथा

39. दासवशकेशव सदा त्वान्नतगजमजगतन्नत्वा
क्षेमीभुविविभुमीक्षे त्वा ज्ञातं नुतिनुतम् ज्ञत्वा ।।

व्याख्याः– नतः गजः-यं तं- नीतगजम्। अजगतम्-विरिञ्चि गतं त्वाम्- नत्वा-विभुम्-ज्ञातम् नुतिभिः-नुतम्-स्तुतम्। त्वाम् ज्ञात्वा- भुवि- क्षेमीसन्। अहम्- ईक्षे ।

प्रत्यर्धगत - प्रतिलोम यमकं यथा

40 साजमं वस्तुमतभा भातमस्तुवमञ्जसा।
कः प्रियस्सु शिवं वेद दवे वंशिषु यः पिकः ।।

व्याख्याः– अजेन-ब्रह्मणा-स्वपुत्रेण-मया-लक्ष्म्या–भार्यया च-सह वर्तत इति सामजम्- द्वा-अजा च सा मा लक्ष्मीश्च-अजमातया सह वर्तत इति साजमम्-वस्तु-परवस्त्याख्यम्-मातासमन्ता च, भा-दीप्तिश्च-तया भातम्-यः-पिक इत्यत्र-स्थितम् य इति, पदम्। व्दितीयया विपरिणम्य अन्वयः क्रियते यं-अञ्जसा। अहमस्तुवम्। यः दवे-वने-वंशा एषां सन्तीति वंशिषु पिकः वंशेन- पिकस्वरसदृशस्वरं कूजतीत्यर्थः। तं सुशिवम् - श्रीकृष्णमित्यर्थाल्लभ्यते। कः-प्रिय-इत्यत्र यः– कः - पीत्यन्वयषि आवेरल्लोपश्च – श्रीवागुरिवाक्येन–गृहीतः–यः – कोपि - वेद-वेत्ति - विदो लटो वेति-णत् ।

सर्वश्लोकगत - प्रतिलोम - यमकं यथा

41 नुतो मया दक्षरमेशदेव
वभातगीतिस्तुत भावयाज।
जयावभातस्तुति गीतभाव
वदेशमे रक्ष दयामतोनु ।।

व्याख्याः – दक्षदेव वभा तया-अवेत्युपसर्गस्य अल्लोपश्च श्रीवागुरि वाक्येन गृहीतः। अवभातया-दीप्तया-गीत्या-स्तुत-आज- रमेश-मया नुतस्सन्-भावय-अवभातदीप्त-स्तुत्यागीतः। भावः -अभिप्रायः-यस्य तस्य सम्बुध्दिः, ईश-जय-सर्वोत्कर्षेण वर्तस्व- मे- वद-दयया नुतस्सन्- रक्षतु ।

विंशं यथा

"तत्र नवम-यमक-मिश्र-चतुर्थं यथा"

42. कल्याणप्रद दिव्य सद्गुणगणः प्रेमान्वितो मान्वितो
देवस्सादर सङ्गृहीत लसितक्षाश्रीकरश्श्रीकरः ।
ज्ञानन्दस्फुरणोत्सुको मम वश श्चानन्दभू र्नन्दभूः
ज्ञानं दत्तु बहिस्तथान्तरिह चापीशोऽभितश्शोभितः ।।

व्याख्याः– दत्तु - ददातु ।

त्रयोदश-यमकमिश्रमष्टादश-यमकम् यथा

43. समा समा नते नते समा समा नते नते ।
समासमा नते नते समा समा नते नते ।।

पदविभागः- सम-असमाः नते नते-सम-असम-अनते-अनते-समासम्-आनते-नते-समा-समा-नत-इन-ते ।

व्याख्याः– मया-लक्ष्म्या-सह वर्तत इति तस्य सन्बुध्दिः-समनतानाम् इनाः-प्रभवः-नतेनाः-नतेनाश्च ते ते च-नते न ते असमाः असदृशाः-महात्मान एवेति भावः-नते नते इत्ययम्प्रयोगः-परमते- इतिवद्बोध्यः। आनते-आनते-नमन्तान्नमस्कृते-नम-अनते-आनमस्कृते- असम-विषम-असमान्नतिर्यस्य तस्य सम्बुध्दिः- आनते-नत-नमस्कृत - इन प्रभो – ते – त्वाम् -

सन्तोषयितुम् क्रियार्थोपसदस्येत्यादिनाकर्मणि - चतुर्थी – मयीति शेषः – मयि नते – प्रणते सति-त्वामेवेत्यर्थः-समासम्-मासहितम्-यथा भवति तथा समा संवत्सरः इति लाटानुप्रासः-त्वत्प्रणति-सत्त्वात्ते मासाः सार्थकाः संवत्सरश्च सार्थक इति भावः ।

पञ्तदशयमकमिश्रमेकोनमिश्रयमकं यथा

44. परमज्ञाज्ञामरप घनचारुरुचानघ ।
परमज्ञा ज्ञामरप रक्षभाव वभाक्षर ।।

व्याख्याः–परम– उत्कृष्ट– ज्ञाश्च अज्ञाश्च –अमराश्च-तान् - पातीति तस्य सम्बुध्दिः। ज्ञा ज्ञामरप–घनचारु–मेघसुन्दरदीप्ते अनघ - मासक्ता-मा लक्ष्मीदेवी यस्य तस्य सम्बुध्दिः – परम – ज्ञ - पण्डित-आज्ञया आमरान् – रलयोरभेदः - अमलान् पातीति तस्य सम्बुद्धिः आज्ञा मरप-भावे - अभिप्रायेऽवभाति - अवभातीति तस्य सम्बुद्धिः भावभव - अवाभ्योपसर्गस्य अल्लोपः श्रीवागुरि वाक्येन स्वीकृतः अक्षररक्ष अक्षरमम्बरान्तधृतेरितिसूत्रात्- “एतद्वैतदक्षरं गार्गीति” श्रुतेः। “येत्वक्षरमनिर्देश्य” मिति भगवद्गीतास्मृतेश्च अक्षरत्वम् ज्ञातव्यम्।

श्री परमेश्वरचरणार्णोजासक्तेन मल्लिकार्जुननाम्ना ।
श्री गुरुकृपया रचितो द्वितीयपादोऽद्य वासुदेवानन्दे ।।

इति वासुदेवानन्दे यमकपादो द्वितीयः ।

अथ तृतीयपादः

श्लोः पद- वर्ण- स्वर- स्थान-व्यञ्जनानाञ्च सम्मतः।
यो वा कोवापि नियमः शब्दालङ्कार उच्यते।।

पदनियमो यथा

तत्र तच्छब्दगत सकलपदयुक्तश्लोको यथा

सोऽजस्तौ विष्णुशौरी हरिगुरुपतयस्ते गतिस्तञ्च तौ तान्
वन्दे तेनापि ताभ्यामपि जगदवितं तैश्च तस्मै नमोऽस्तु।
ताभ्यां तेभ्यश्च तस्मात् भुवनमुदभवच्चापि ताभ्यां च तेभ्यो
दासोऽहं तस्य तेषामपि सपदितयोस्तेषु तस्मिंस्तयोर्थी।। 1

अविभिन्न – पदक-पूर्वोत्तरार्थः श्लोकः

धन्योस्म्यहं पदाब्जे पतितं मां श्रीश रक्षतो भवतः।
श्रीश भवतः पदाब्जे पतितं मां रक्षतोऽस्मि धन्योऽहम्।। 2

व्याख्याः - पूर्वार्धे पदाब्जे इति सप्तमी। रक्षतो भवत इति पञ्चम्यौ उत्तरार्धे तु – भवत इति षष्ठी । पदाब्जे इति प्रथमा रक्षत इति क्रियापदम् ।

अथ वर्णनियमः

<u>**श्रीरामहितस्तु' इति षड्वर्णक-श्लोको यथा**</u>

श्रीराम श्रीहिततम महित श्रीमहिस्तुत ।
तत श्रीश्रीमहिमत मतराम ममस्तुमः।। 3.

व्याख्याः - श्रीः – रामाः यस्य तस्य सम्बुद्धिः – श्रियाः हिततममहित – श्रीमहिभ्यां स्तुत – तत- विस्तृत – श्रीश्रीमह्योः मत – मम मत हे राम – स्तुमः।

सजातीय वर्ण पुञ्ज – श्लोको यथा

मम ममता त्वयि विष्णो ततनत इह हृदि सदा वस मे।
न तु या या–या या यदि ददरता धूरगा ते स्वात्।। 4.

व्याख्याः- तत – विस्तृत, ततः – तस्मात् – मे – इह – हृदि – सदा वस – न तु या याः – या याः यदि – ददातीति ददः – ददाति – दधात्योर्विभाषेति शः – तस्य सम्बुध्दिः हे दद – ते तव – ददता– ददस्यभावः – दूरगा स्यात्।

अथ स्वरनियमः

तत्र पादैकाच्कं सर्वदीर्घं यथा

सो ऽजो ऽदोषोऽरोषो
मोहो धीश्रीरीतीः प्रीतीः कीर्तीः।
सारां कान्तां श्यामा
मा भां भेजे रेजे मेरे रेमे ।। 5.

व्याख्याः – मेरे लक्ष्मी भूमी रेमे।

अथ सर्वेकाच्कं सर्वह्रस्वम्

क्षितिद्विड्गिरि विच्छित्ति गिरिभिद्विधि विन्निधिः।
निर्मितिस्थितिविच्छित्तिविधिः किरिरिति स्थितिः।।

व्याख्याः–किरिः–वराहदेवः–क्षितिद्विडित्यनेन हिरण्याक्षो गृह्यते – विधिवन्निधिरिति – पृथक्पदं – विधिविदां – निधिः – निधिसदृशः।

अथ स्थाननियमः

तत्र निरोष्ठ्य - निस्तालव्यं – यथा

सहस्रकरसन्तानार्णवरत्नं सदावळेः ।
रक्षकं लोकनेतारं तं वन्दे राघवं सदा ।। 7.

उकार-मकार-पकार-सहित-केवल-कण्ठाक्षरं यथा

गङ्गगां गुङ्गमां षुङ्गा साङ्ग पाङ्ग कगां मम।
कगा महमगा मङ्ग गाहं गाहं महागमम् ।। 8.

व्याख्याः– हे अङ्गेति सम्बोधनम् – महांश्चासावागमश्च महागमः। तङ्गा हङ्गाहम्–गुङ्गमाम् –धरणिम् – गमाम् गमे सुपि वाच्य इति वार्तिकेन असंज्ञायां खच्-ततः खित्यनव्यन्वेति– गोशब्दस्य ह्रस्वः – ततोमुम् –एवं गुङ्गमामिति प्रयोगः– सिद्धः– मङ्गायाः–अलवेलुमङ्गादेव्याः अपाङ्गौ पातीति तस्य श्रीवेङ्कटेश्वरस्य अङ्गकगां अवयवगतां ममकगां शिरोगताम् – गाङ्गगाम् – गङ्गासम्बुन्धुदं अहं अगाम् – प्राप्तोभूवमित्यर्थः– इण् गतावित्यस्माल्लिङि अगामिति रूपम्।

केवलं कण्ठ्याक्षरं यथा

अघहां गाङ्गगङ्गागं गाहं गाहं खगङ्खगः।
कगां कगां गाङ्गकगं कंहां गाङ्गकगाघहः।। 9.

व्याख्या - खगः-गरुत्मान् – यद्यपि खगशब्दः पक्षि सामान्यवाचकः तथापि गरूत्मतो मुख्यत्वात् प्रकृतानुरोधाच्च स हि गृह्यते। अघहा – अघासुरघाती – पापघाती च – सर्वप्रातिपदिकेभ्यः – क्विब्या वक्तव्य इति क्विप् – तस्य श्री विष्णोः अङ्गागगम् – प्रत्यंगागम्– खगम् – आकाशगङ्गाम्– गङ्गागम् – गासम्बन्धिकम् – वारिपूर्वकगम् –शिरोगतं पश्चात् अङ्कगं उत्सङ्गगतम्–ततः पश्चात्–अङ्गागम् – प्रत्यङ्गगतं कगाङ्गाङ्गं – गकगं यथा भवति तथा–हेत्यव्ययं गाहं गाहम्– अङ्गागकगानि– प्रत्यङ्गगानि च तानि – अघानि पापानि च – अङ्गाङ्गकगाघानि तानि वध्यादिति – अङ्गाङ्गकगाघहः – आशिषि हन इति – ङः।

निष्कण्ठ्यं यथा

विष्णु-श्रीभूमिभृत्सूरि विरिञ्चिस्तुतिरीतिवित्।
उरुमूर्ति-प्रीतिनीति-बुद्धि-श्री-धृति- दीप्ति-धृत् ।। 10.

तत्र द्विव्यञ्जनं यथा

देवा देवादिदेवो दिवि दिवि दिवि विद्वादिदेवैर्दिवाऽऽदि-
र्वेदैर्वेदादिवादीवद विविदवदोदैव विद्वादिदेव।
वादा दादाववादीद्वद वद ददेऽवाववेदादिवेदं
विद्वद्विद्वादिविद्विध्दद विददविदे देव वादेवदादिः।। 11

व्याख्याः- देवानामदेवानाञ्च आदिदेवः – अत एव - आदिः विष्णुरिति प्रकरणाल्लभ्यते – वेदादीवादी – प्रणववादी सन् – दिवा- अहनि दिवेत्यनेन स्वसृष्टेरुत्तरकालोऽभिहितः – विद्भिः पण्डितैश्च तैर्वादिभिश्च तैर्देवैश्च विद्वादिदेवैः साकमिति शेषः। वेदैः करणैर्वद इव वक्तेव विष्णोर्वस्तुतो निर्गुणत्वात् वक्तृत्वाभावेऽपि वक्तृत्वं प्राप्तः – स्वशक्तिभिर्देवानुद्धर्तुमित्यभिप्रायो गम्यते। वददित् सन् वादैव विद्या – भागधेयदित्सन्वा – एते देवाः वक्तारो – भक्तिमत्वादिति ज्ञात्वा वा एतेषां भागधेयं समीचीनमिति ज्ञात्वा वेत्यभिप्रायः दिवि दिवि – स्वर्गे स्वर्गे – दिवि द्योतमाने – स्वनिवासस्थाने च - दिदेव – चिक्रीड – किञ्च देवानां वादे वदेषु वक्तृषु–आदिस्सन् – विद्वद्विद्वद्विदाम् प्रतिपण्डित विदामादिः-चसन्– ददा तीति ददः – श्रीविष्णुरित्यर्था-दवगन्तव्यम् – तं वेत्तीति दद वित् सददा तीत्यदः-तं वेत्तित्यदवित्-ददविश्चासौ आददिच्च- तस्मै ददविददविदे – वदवदेति च- अवाऽव – रक्ष रक्षेति च – वादात् – एतादृशप्रार्थनाविशेषादिति भावः- आदौ – अवादीत् – वेदादिवेदं प्रणवं ददे।

पादैक व्यञ्जनं यथा

नुन्नैनो ननान निन्निननुवो नानाननेने ननो
पापापाप पपापपाप पपपीपा पापपूपापप ।
तत्ताते ततता ततात तततात्तातीति तातीततां
दद्दादौ दददा दिदाद दददो दोदोद दादेददौ ।। 12.

पदविभागः नुन्नैनः, अननन, अननिन्, इन, नु, नः, नानानन, इनेननः, अपाप, आपापपप, अपपापप, पपीप, अपाप, पूपापप, तत्ता, ते, तत, तात, तात, ततत, अत्तातीति ताती ततां दद्दादौ, दददादिद, दद ददो दोदोदद, आदे, ददौ ।

व्याख्याः- नुन्नानि एनांसि येन तस्य सम्बुध्दिः न विद्यते प्राणनं यस्य तस्य सम्बुध्दिः, आप्राणोह्यमनाश्शुभ्र इति श्रुतेर्निर्गुणस्य विष्णोरप्राणत्वात् अननेति युक्तमुक्तम् अननम्। प्राणनं यस्यास्तीति तस्य सम्बुद्धिः मनोमयः प्राणशरीरो भारूप इति श्रुतेस्सगुणस्य विष्णोस्सप्राणत्वात् अननिन्निति युक्तमुक्तम्। इन- प्रभो नः पुरुष हे परमपुरुषेत्यर्थः। न्वित्यव्ययम्- नानाननेत्यनेन – अनेकवक्त्रनयनमिति भगवद्गीतोक्तं विश्वरूपं चोपादितम्- इनस्य सूर्यस्य इनः प्रभुः इनेनः स चासौ ना पुरुषश्च तस्य सम्बुध्दिः सवितृमण्डलमध्यवर्तिपुरुषत्वात् नारायणस्य इनेनन इति सम्बुद्धिरुचिता- आपाप-अनघ आपापान् पातीति-आपापप- तान्- पातीति-तस्य सम्बुध्दिः - आपापपप- आपपापान् – पापरहितान् पातीति तस्य सम्बुध्दिः आपपापप- पपीः सूर्यः तं पातीति तस्य सम्बुध्दिः पूपाः अपूपाश्च आपः उदकानि च पूपापाः- ऋक्पूरब्धूरित्यादिना अप्रत्ययः – अपापानां पुरूषाणां सम्बन्धिनः पूपापान् पिबतीति तस्य सम्बुध्दिः ततः विस्तृतश्चासौ तातताः पितामहश्च तततातताः महाविरिञ्चिरिति यावत्- तस्मिन् ततता विस्तृतत्वं यस्य–तस्य सम्बुध्दिः दददश्च ते आमी-अमी-अमी च– दददमी- अमी –अमी सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्ध इति सिद्धां कौमुद्युक्तप्रकारेण- अदश्शब्दस्यानेकधा आवृत्तिः तेभ्यो ददातीति-

दद ददोदोदोधदः- ददाति दधात्योर्विभाषेतिशः – आदे श्रीविष्णोः इति प्रकरणाल्लभ्यते, दतताम् - आदिम् - त्वामेवेत्यर्थः- ददातीति-दददादिदाते तव- तत्ता - तत्वम् इदं कर्तृपदम्- आत्ता-प्राप्ता अतीतिः –अतिशयेति बाधायैस्ते अत्तातीतयः- तेषाम्भावः – अत्तातीतितताताम् – अतीतः – अत्ताती तिता तीतः – तस्य भावम् – अत्तातीति तातीतताम् – दतः - दन्तान् ददातीति – दद्दः - बाल्याश्रयः – कालविशेष इत्यर्थः तस्य आदौ – ददौ ।

सर्वैकव्यञ्जनं यथा

नानानने नेननैनोऽनेनानुन्नं नुनोननु ।
नैनेन नुन्ननानैना नूनं नेने ननाननी ।। 13

पदविभागः- नानाननेनेन–न–एनः-अनेन-अनुन्नम्–नु-नः-ननु-ना-एनेन-नुन्ननानैनाः–नूनम्–न–इनेन–न–अननी ।

व्याख्याः- ननु – नानाननश्च नानाननश्च – नानाननौ – श्रीचतुराननसहस्रवदनौ – तयोः- इनेन प्रभुणा –अनेन- अमुना-श्रीविष्णुनेति प्रकरणाल्लभ्यते- नः अस्माकं –अनुन्नं-अनवाप्तं – एनः –नः – अस्माकं – सर्वाघानि – विष्णुना - नुन्नानीत्यभिप्रायः – न्वित्यव्ययम् – इनेन प्रभुणा – एनेन एतेन–विष्णुनेत्यर्थः–नुन्नानि नानैनांसि – अनेन पापानि यस्य सः नापुमान् – आननम् – प्राणनम् अस्यास्तीत्यननी चिरञ्जीवीत्यर्थः। नेतिन – बाढं –चिरञ्जीवी भवतीत्यर्थः नूनम् – निश्चितमेतदित्यर्थः यतोऽस्माकं सर्वाघानि – विष्णुना नुन्नानि – अतो वयमपि चिरञ्जीविन इत्यभिप्रायः।

इति पद-वर्ण-स्वरस्थान-व्यञ्जना नियमाः

अथ द्विरूपोत्तरादीनां लक्षणानि

श्लोः अनुलोमविलोमाभ्याम् यदि स्यादुत्तरद्वयम् ।
उभयोः प्रश्नयोः प्राहुस्तद्विरूपोत्तरं बुधाः ।। 1

अनुलोमविलोमाभ्यां सरूपं चेदिहोत्तरम् ।
प्रश्नस्य प्रश्नयोर्वातदेकरूपोत्तरं मतम् ।। 2

दत्तच्युताक्षराद्यन्तं भवेत्प्रश्नोत्तरं यदि।
दत्तच्युताक्षराद्यन्तं तद्वदन्ति मनीषिणः।। 3

प्रश्ने तु प्रथमं पूर्णमादिमध्यान्तगैस्ततः ।
वर्णैश्च्युतैरुत्तरं यत्तत्स्यात्पूर्णक्रमच्युतम् ।। 4

एकावृत्तिर्द्विरावृत्तिरुत्तरस्य भवेद्यदि ।
एकावृत्तं द्विरावृत्तं तत्स्यादित्यवगम्यताम् ।। 5

भेदकं यदि भेद्यञ्च द्विधा भूत्वोत्तरं वदेत् ।
अर्थान्तरे त्वखण्डं च तत्स्याद्भेद्यकभेदकम् ।। 6

यस्मिन्प्रश्नात्मके पादत्रय एव निगूढतः ।
चतुर्थपादश्चेद्गूढः चतुर्थचरणं तु तत् ।। 7

यस्मिन् प्रश्नात्मके पद्ये चरणेषु चतुर्ष्वपि ।
अस्ति चेदुत्तरं गूढं तद्गूढोत्तरमुच्यते ।। 8

अथ क्रमेण तेषामुदाहरणानि

द्विरूपोत्तरं यथा

श्लोः प्रह्लादमाहाऽजगरो वचः किम्
गोपी हरिं वीक्ष्य किमाह गोपीम् ।
अत्रानुलोमेन विलोमतश्च
प्रश्नद्वयस्योत्तरयुग्ममूह्यम् ।। 1

व्याख्याः– हरिविच्छमपरोभवम् – वम्भरोपमच्छविरिहः– वबयोरभेदः इत्युत्तरद्वयम् । हरिवदिति प्रह्लादसम्बुद्धिः ।

एकरूपोत्तरं यथा

श्लोः सन्ततं हरिदासस्य सम्बुध्दिः कोचिता मम ।
अनुलोमविलोमाभ्यामेकरूपमिहोत्तरम् ।। 2

व्याख्याः– अत्रोत्तरम् –सदा पद्मापदास

श्लोः विष्णोरब्धिसुतायाश्च कीदृशी तु करस्थली ।
अनुलोमविलोमाभ्यामेकरूपमिहोत्तरम् ।। 3

व्याख्याः– अत्रोत्तरम् – सारसारसा – अस्यार्थस्तु सारं श्रेष्ठं सारसं कमलं यस्यां सेति वेदितव्यम् ।

दत्तच्युताक्षराद्यन्तं यथा

श्लोः को लक्ष्मीनायकः का भुवनपरिवृढस्यास्य सम्बुध्दिरूह्या
का विष्णोर्मूर्तिरर्च्या निरवधि करुणस्यास्य सम्बोधनं किम्।
काऽस्य श्लाघ्याऽस्य सम्बुध्दिरिह वसुकृतः कायदत्तोत्तरं स्या-
दादेः तत्रादिमान्त्याक्षरयुतिवियुतिभ्यां क्रमादुत्तराणि ।। 4

व्याख्याः– कास्य श्लाघ्येति – अस्य विष्णोस्सम्बन्धिनी का श्लाघ्येत्यर्थः अत्र–आदेः –प्रथमप्रश्नस्य यत् –उत्तरं स्यात् – तत्र तस्मिन्नुत्तरे – शेषं सुगमम् (वसुदयालोकेशवः) केशवः – लोकेशः यालोके – दयालो- सुदया – वसुद- इत्युत्तराणि।

श्लोः कस्सीतेशश्च कीदृङ्मुरमथनकथा का वराहोद्धृता के
सम्बुद्धी विष्णुयोग्ये रुचिरनखमणिप्रोज्ज्वले के मुरारेः
सम्बुध्दिः श्रीपतेः का मुररिपुरमणी का यदत्रोत्तरं स्या-
दादेस्तत्रादिमास्त्याक्षरयुतिवियुतिभ्यां क्रमादुत्तराणि।। 5

व्याख्याः– रामः – सारा- रसा – वर – देव- पदे – माप – रमा – इत्युत्तराणि – "रमा पदेव रसारसारामः"

पूर्णक्रमच्युतं यथा

श्लोः कीदृग्विष्णुस्तज्जनस्य सम्बन्धी कोऽर्थदः पुनः।
स कीदृशस्तत्प्रिये के तेषां श्रीलेश उत्तरम् ।। 6

व्यख्याः– श्रीलानाम्–लक्ष्मीवतां सम्पद्युक्तानामिति यावत्– ईशः इति प्रथमप्रश्नस्योत्तरम्। द्वितीयप्रश्नस्य प्रथमाक्षरपरित्यागेन 'लेश' इत्युत्तरम्। तृतीयप्रश्नस्य द्वितीयाक्षरपरित्यागेन 'श्रीश' इत्युत्तरम्, चतुर्थप्रश्नस्य तृतीयाक्षरपरित्यागेन 'श्रीले' लक्ष्मीभूमी इत्युत्तरम्।

एकावृत्तं यथा

श्लोः विष्णोः का स्त्री तस्य मूर्तिः कीदृक् तेन च का धृता ।
स किं दद्यात्किं पिबति रमा नीलाधरामृतम् ॥ 7

व्याख्याः– "रमा" - "नीला" - "धरा" "अमृतम्"- "रमानीलाधरामृत" मित्युत्तराणि ।

द्विरावृत्तं यथा

श्लोः विष्णोः कावति सज्जनालिमिह का सम्बुध्दिरस्योचिताऽ
सौ कीदृक्क इमं हरिं श्रयति का सम्बुध्दिरस्योचिता ।
कीदृत्तद्वशमल्लिकार्जुनसुधीः कीदृक्स विष्णुर्दया
वीक्षारक्षितसेवको वद दयालोके शवस्याश्रितः ॥ 8

व्याख्याः– दया-लोकेश- वशी- आश्रितः – दयालो – केशवस्याश्रितः दयालो केशवस्याश्रितः – इत्युत्तराणि – दयायाः आलोकेन ईशाश्च – ते वश्याश्च दयालोकेश वश्याः – आश्रिताः यस्य सः- विष्णुरित्यन्तिमोत्तरस्यार्थः ।

भेद्यभेदकं यथा

श्लोः विष्णुः कामब्रवीत् प्रीतो भगवान्नारदं प्रति ।
धत्ते स कीदृशीं लक्ष्मीं मङ्गलाङ्गामिहोत्तरम् ॥ 9

अथ पादत्रय-निगूढ-चतुर्थपादं यथा

आत्मानात्मविचारधन्यसुमनो राजस्तुतस्सूरिराट्
लोकश्रीकरधीनिधिर्धृतमणिः कल्याणरक्षी प्रभुः ।
कश्श्रीपण्डितमल्लिकार्जुनवचो गुम्भोत्थहर्षः पुमान्
क्षीराम्भोनिधिकन्यकामणिविभुः श्रीमान् परात्माहरिः॥10

व्याख्या-पादत्रयं प्रश्नात्मकम्–पादत्रये निगूढश्चतुर्थपादः उत्तरात्मक इति निगूढः।

गूढोत्तरं यथा

स सर्वबुधगीर्मान्यः पठारिर्भृत्यराज्यदः ।
मायीमेशः कं सुशब्दं रक्षणं सुप्रतो जगौ ।। 11

व्याख्याः- अस्य प्रश्नस्योत्तरं तु अस्मिन्नेव श्लोके यथाक्रमम् अयुग्माक्षरसंयोजनेन – सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेति प्रतीयते।

अथ सङ्कीर्णपादश्चतुर्थः

अथ एकाच्कं सर्वलघुवृत्त्यनुप्रासश्च

श्लोः जय जय हरसख नरवर जयदर कर सकलजगववन ।
वनजनयन कनकवसन जय जय वरवरद जलदसम।। 1

व्याख्याः - नरवर - पुरुषोत्तम।

अथ अर्थैकाच्कं सर्वदीर्घं वृत्त्यनुप्रासश्चतुर्थे पादे प्रतिलोमयमकञ्च

श्लोः श्रीधी नीतीर्ह्री गीरीतीर्लीतः प्रीतीः कीर्तीर्नीली ।
तेने मेने भेजे रेजे ते स्वेमे रेरे मे स्वेते ।। 2

व्याख्याः- नीली – विष्णुः – तेने – सर्वकर्तृत्वात् – मेने – सर्वज्ञत्वात्–भेजे–सर्वेश्वरादिभ्यः – अतः रेजे – स्वेते-आत्मानं प्राप्ते –स्वे–आत्मीये–ते–मा लक्ष्मीश्च–इरा-भूमिश्च – मेरे–रेमे ।

अथ सर्वैकाच्कं सर्वदीर्घम् अव्यपेतयमकञ्च

श्लोः रामा भाता रामा भान्या वामाक्ष्मा वामासारा
कालाकारा कालार्च्याद्या दासाधारा दासादाया ।। 3

व्याख्याः- हे राम-अन्या-अश्रुताऽदृष्टपूर्वेत्यर्थः। रामा अभिरामा भाता-प्रकाशिता-वामावल्गुः – क्ष्माजा – सीता – साच सा, वामा वनिता च तस्याः सारा कालाकारा नीलाकारा-काले- समये- अर्च्या –आद्या–दासानाम् आधारा आभा दीप्तिः – तवैवेत्यर्थः दानानाम् आदायालाभात्मिका।

अथ पादार्धैकाच्कं सर्वदीर्घं सर्वश्लोकयमकञ्च

श्लोः धीश्रीरीतीर्नादावार्या धीश्रीरीतीर्नादावार्याः।
धीश्रीरीतीर्नादावार्या धीश्रीरीतीर्नादावार्याः ।। 4

व्याख्याः– धीश्रीः– ईतीः – ना – आदौ- आर्य – आधीश्रीरीतीः – न–अदाः वार्याः धीश्रीरीतीः नादावार्याः– धीश्रीरीतीः–ऩ आदाः वार्याः– हे आर्य श्रीविष्णो धीः श्रियां लक्ष्म्यां यस्य सः धीश्रीः– रथाङ्गपाणिरित्यदाविव समासः । ना – पुरुष – श्रीविष्णुस्त्वम् – आदौ प्रथममेव – इदानीं तु किमु वक्तव्यमित्यर्थः – ईतीः – ईतिबाधाश्च – न विद्यन्ते – न विद्यन्ते धियः श्रियश्च एषां तेषां बुद्धिहीनानाम् – दरिद्राणाणाञ्च रीतय इव रीतयस्ता – अधी श्रीरीतीश्च वार्याः निवार्याः – नादाः न दत्तवान् – परन्तु – नादेन – अनाहतादि चक्रध्वनिना तल्लाभेनेत्यर्थः अवार्याः अनिवार्याः धियाम्– श्रियाम् – सम्पदाञ्च – रीतीश्च धिषु – श्रीः –सम्पत् – एषां

ते- धीश्रियः – महात्मानः तेषां रीतीश्च – आदाः दत्तवान् – वार्यास्तु न दत्तवान् त्वमेवेत्यर्थ अस्मिन् श्लोके। पूर्वार्धतात्पर्यं सुगमम् – उत्तरार्धतात्पर्यं तु – त्वद्भक्तस्य नादस्थैर्यं कृत्वा तत्सिद्धिसञ्जातं प्रतिभादिकम् – अणिमादिसिद्धिरपि दत्वा – महात्मनां रीतीश्च दत्वा तासामनुपमानत्वापरिपूर्णत्वाच्च – ताः अनिवार्याः कृत्वा – तदन्याः वार्यास्तु न दत्वा - भक्तवत्सलोसीति दिक् ।

अथ पादैकाच्कं–सर्वलघु–अव्यपेत – यमकं छेकानुप्रासश्च

श्लोः भवहर भवहरसख मम वरवरदद वरद वरद वर वरदः ।
दिशि दिशि गिरिजितिविधिमिति कुरु गुरुगुरुरुरुगुरडुपुरुगुः।। 5

व्याख्याः- हे भवहर – संसृतिहर – हरसख – वरश्रेष्ठ – ददतीति ददाः वराणां ददाः – वरददाः – तेषां वरद – वरप्रद – वरद – काञ्चीक्षेत्रगतवरदराज – वरवरद – श्रेष्ठवरदः भव – दिशि दिशि गिरि-वचपि–जितेः–जयस्य-विधिम्–इति एवं प्रकारेण–गुरूणां गुरुः स एष पूर्वेषामपि गुरुः कालेनानवच्छेदादिति श्रीपातञ्जलसूत्रात् – उरुगुः माहावाक्–उडूनां नक्षत्राणां–पुरवः–बहुलाः गावः घृणय यस्मिन् सः-उडुपुरुगुः– उडुशब्दःचन्द्रसूर्यादीनामप्युपलक्षणः अनुकृतेस्तसचेति –श्रीवैयासिकसूत्रस्य भाष्ये द्रष्टव्यम्– एवं लक्षणः त्वं कुरु।

अथ निरोष्ठ्यं निर्दन्त्यं वृत्त्यनुप्रासश्च

श्लोः हे श्रीकर कञ्जेक्षण करचरण करीशरक्षक श्रीश ।
क्षीर हर हीर गङ्गाहार यशः श्री हरे रक्ष ।। 6

अथ निर्मूर्धन्यं निरोष्ठ्यं निरूष्मकम्
वृत्त्यनुप्रासश्छेकानुप्रासश्च

श्लोः कन्धिजा कलितकेलिकलायां
काञ्चिकाञ्चलगनीलकलालौ ।
अङ्गनानयनकज्जलजाले
कायगे कनतिना किल नीलः ।। 7

व्याख्याः- नीलकलालौ – इन्द्रनीलमणि कशावल्येत्यर्थः –ना–पुरुषः श्रीविष्णुरिति यावत्-नीलस्सन्–कनति किलेत्युत्प्रेक्षा ।

अथ निरोष्ठ्यम् अतवर्णं छेकानुप्रासो वृत्त्यनुप्रासश्च

श्लोः खगशरण चरणरणचण कृष्ण श्रीकर करारिशङ्खकर ।
अघहर हरसख संसारे सारे सारसाङ्घ्रिकश्शिरसा ।। 8

व्याख्याः- रणचण- युद्धसमर्थ – श्रीकरकर – श्रीकरकिरण –अरिशङ्खकर-चक्रशङ्खहस्त –संसारे– असारे – इति पदच्छेदः।

अथ निर्मूर्धन्यं निरन्तस्थ्य निरूष्मकम्- सजातीय वर्णपुञ्जं व्यपेतयमकञ्च – उपगीतिवृत्तं – गर्भञ्च

श्लोः मामा मापातु मन्माता । नानानाकिनुतोधतु ।
नेता तातादिमोनन्तो ।नानानागमगोपि च।। 9

व्याख्याः- मन्माता–मा–लक्ष्मीः–माम्–आसमन्तातात्पातु अथ तु –नानानाकि नुतः–नेतातातश्चासौ – आदिमश्च – तथोक्तः – ना–पुरुषः–परमपुरुषः इत्यर्थः– नानागमगः अनन्तः श्रीविष्णुरपि च – पातु – अस्मिन् पद्ये द्वितीयपादादि-प्रथमपादान्तं पठिते सति उपगीतिवृत्तम् – यथा "नानानाकिनुतो थतु नेता तातादिमोनन्तः- नाना नागपगोपि च मा मा मा पातु मन्माता"।।

अथ व्यपेतयमकम्- छेकानुप्रासश्च

श्लोः नवनीलनीलदसमं प्रणुमो नवनीतचोरमगुणं गुणिनम् ।
नवनीप काय भयदो य इमा नवनीतलेऽनति सतस्सतितम्।। 10

व्याख्याः- नीलद इत्यत्र रलयोरभेदात् –नीरदशब्दो गृह्यते । अगुणं निर्गुणं- सन्तं सज्जनान् सति समीचीने – यः – वनीपकाय –भयदो नेत्यन्वयः ।

अथ अस्पर्शाक्षरं यमकञ्च- व्यपेतम्

श्लोः सुरसार रसासार व्याहारैस्साश्रया सह ।
सुरसार हसास्येश सुरसा रहसि श्रिया ।। 11

व्याख्याः– सुराणां सारः– हसः हासः यस्य तत् – आस्यं यस्य तस्य सम्बुध्दिः– सुरसारहसास्य– हे ईश – सुरसा – समीचीना भूमिः श्रिया सह – लक्ष्म्या सह – सुरसार – सुरसालस्य – रलयोरभेदः परिपक्व सुरसालफलस्येत्यर्थः – तद्रसस्य आसारः –धारासम्पातः – तत्सदृशव्याहारैः – उक्तिभिः – करणैः – रहसि – साश्रया – त्वदाश्रयसहितेत्यर्थः।

अथ सर्वैकाक्षरं व्यपेतयमकञ्च

श्लोः नेनेन- नुन्ननानैना- नेनेननु- नाननी ।
नेनेन-नानाननेना- नेना- नुना- ननानि नः।। 12

पदविभागः– ना – इनेन नुन्ननानैनाः – न- इनेन- ननु – न- अननी- न इनेन नाना ननेनान्–एनान्–ऊनानना नी– नः।

व्याख्याः- ननु–इनानाम्-प्रभूणाम्–ब्रह्मादीनाम्- इनेन-प्रभुणा – श्रीविष्णुना–नुन्नानि नानैनांसि- अनेक पापानि यस्य सः इति नेन नुन्ननानैनाः–ना पुरुषः– इनेन प्रभुणा – तेनैव श्रीविष्णुनेत्यर्थः – अननं प्राणनम् अस्यास्तीत्यननी-चिरञ्जीवेनेति न –बाढं चिरञ्जीवीत्यर्थः एवमपि–एनान्–इनस्य सूर्यस्य–इनः प्रभुः चासौ नानाननस्य –आदिशेषस्य- तस्य सहस्राननत्वात् । इनः प्रभुश्च – तम्- इनेन – नानाननेनम् – अत्र गौरवार्थं बहुवचनप्रयोगः कृतः – इनेन नानाननेनानिति–नः– अस्माकम्–ऊनानि च तानि आननानि च– न स्तुवन्तीति शेषः।

अथ अव्यपेतयमकम्, व्यपेतयमकम्,

पादाभ्यासयमकम्, निर्दन्त्यम्,

वृत्त्यनुप्रासो न्यस्ताक्षरञ्च

श्लोः श्री शोभाग्यवशाच्चिरं रघुवरः प्रज्ञाकरं ज्ञाकरं
प्रायच्छच्च वशोवरं शुभकरं भव्यप्रभाव्यप्रभाः ।
श्रीशो भापरभावकृच्छुभकृपाढ्यः कृष्णराण्मुख्यभूः
श्रीशोभापरभाव कृच्छुभकृपाढ्यः कृष्णराण्मुख्यभूः।। 13

व्याख्याः– भव्या कल्या श्री प्रभाव्या प्रभाः (सकारान्तोसौ) यस्य सः श्रीमती शोभा येषां तेषाम् – आसमन्तात् – परभावं परमभक्तिं करोतीति – श्रीशोभापरभावकृत् – सा च सा शुभकृपा च तया आढ्यः कृष्णः नीलश्चासौ राट्च कृष्णराट् -मुख्ये च ते – भू श्रियौ – भू श्रीदेव्यौ च तयोः शोभायां परं सक्तं भावम् अभिप्रायं करोतीति मुख्यभू – श्रीशोभापरभावकृत् कृपयाः आढ्यः राजा-दयावानिति भावः। शुभ श्चा सौ कृपाढ्यश्च राज्ञां मुख्ये मुखमिव प्रभावे भवतीति राण्मुख्यभूः कृष्ण इति राण्मुख्यभूः वशः श्रीशः लक्ष्मीपतिः रघुवरः-प्रज्ञाकरं, ज्ञानां

पण्डितानां-आकरं-शुभकरं वरं – भाग्यवशाच्चिरं-प्रायच्छच्च-एतस्मिन् न्यस्तार पद्ये चतु रक्षरैको नविंशति पन्क्ति क्रमविधानेन लिखितेसति – श्रीवरप्रज्ञा यशोभव्य प्रभाव कृष्णभूप कृपाराट्-इति प्रतीयते।

अथ चतुर्विध न्यस्ताक्षरश्लोकः

श्लोः श्रीमद्देवगुरो चयारुपवरावासस्वतस्सुज्ञस-
च्छ्रीदेवामलवर्णिताभिरगसुक्षेमाशुभक्तप्रिय ।
श्रेयो यच्च यदेकयज्ञविमलार्थः श्रीलदेहास्पलो
लाम्भोभूचराणास्य नश्वर जगज्जालेऽगुणस्याच्छमः।। 14

व्याख्याः– श्रीमद्देवगुरो- दयारूप-रलयोरभेदः – दयालुप-ललयोरभेदः – दयालुप- वरश्रेष्ठः आवासः- यस्य – तस्य सम्बुध्दिः – स्वतः सुज्ञसत् – सत्यवस्तो- श्रियः – लक्ष्म्याः – देव- अमलैः अमरैः वर्णित- अखिरग – अखिलग- समीचीनं क्षेमं यस्मात् तस्य सम्बुध्दिः भक्तप्रिय- श्रीलः लक्षणः देहः यस्य तस्य सम्बुद्धिः – असुषु- प्राणेषु – अलोल असतृष्ण यद्यभविष्यन् प्राणाः परमेश्वरस्य तर्हि लोलत्वमभविष्यत् - अप्राणोह्यमनाश्शुभ्र इति श्रुतेः। परमेश्वरस्य अप्राणत्वात् – असु तृष्णत्वं शास्त्रसम्मतमिति मत्वा- आसुषु अलोल इति प्रतिपादितम् – अम्भोभू चरणास्य – कमलसदृशपादवदन- अगुण निर्गुण- विष्णो- आशु – द्रुतम् – यत् श्रेयः – एकयज्ञस्य – मुख्ययज्ञस्य ज्ञानयज्ञस्येत्यर्थः – उक्तञ्च श्रीमद्भगवद्गीतासु – श्रेयान्

द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तपेति विमालार्थः – निर्मलप्रयोजनं तत् श्रेयः – मोक्षं- यच्छ – नश्वरजगज्जाले श्रमः स्यात् – एतस्मिन् न्यस्ताक्षरश्लोके चतुरक्षरैकोनविंशतिपङ्क्तिक्रमविधानेन लिखिते सति श्रीगुरुवासुदेव - रमाप्रिय – कमललोचनगण इति प्रतीयते षडक्षरत्रयोदशपङ्क्तिक्रमविधानेन लिखिते सति "श्रीदवासव – सुप्रिय महाचरण" इति प्रतीयते। नवाक्षराष्टपङ्क्तिक्रमविधानेन लिखिते सति "श्रीपसखिप्रियहास्य" इति प्रतीयते। एकादशाक्षरसप्तपङ्क्तिविधानेन लिखिते सति "श्रीराम – शुकस्वर" इति प्रतीयते ।

अथ श्रीमद्भागवत श्लोकन्यासोव्यपेत यमकञ्च

श्लोः शिवाद्य सुज्ञ देहि वर्यपक्षरान्यवेद्यदा
शिवाद्य सुज्ञ देहि वर्ण्य पश्य राममन्मभाः।
शिवाद्य सुज्ञ देहि वक्त्र पद्मराजयोगगा
शिवाद्य सुज्ञ देहि वन्द्य पत्स्वराट्चक्रि क्रियाः।।

पदविभागः– शिव – अद्य – सुज्ञ – देहि – वर्यप-क्षरान्य – वेद्यद – आ- शिवाद्य सुज्ञ – देहि – वर्ल्य- पश्य – राम- मन्मभाः – शिवाद्य – सुज्ञद- एहि- वक्त्रपद्मराजयोगग-असि (शसयोरभेदः) वाद्य सुज्ञ देहि – वन्द्य- सत् – स्वराट्- चक्रिक्रियाः।

व्याख्याः– शिव- सुज्ञदेहि वर्यान् प्राणिमुख्यान् – पातीति- तस्य सम्बुध्दिः क्षरान्य – अक्षर- वेद्यं- ज्ञेयम् – आत्मवस्तु ददातीति तस्य सम्बुद्धिः शिवाद्वैः सुज्ञदेहिभिश्च –

वर्ण्य – शिवानां मङ्गलानाम् आद्य –परममङ्गलेत्यर्थः। उक्तञ्च- श्रीविष्णु साहस्रनामावळलिप्रकरणे – पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् इति सुज्ञः – पुत्रमित्रादिमित्यर्थः ददातीति तस्य सम्बुद्धिः – यद्वा सुज्ञः गुरुमित्यर्थः – ददातीति तस्य सम्बुध्दिः- वक्त्रं पद्ममिव यस्य तस्य सम्बुध्दिः- वृत्यन्तर-निरोधपूर्वक-निर्विकल्पक-धारावाहिक-वृत्तिरसं प्रज्ञातसमाधी- राजयोग इति शास्त्रात्तत्र किल सच्चिदानन्दलक्षणः – परमात्मा – विष्णुः – स्वस्वरूपाभेदेन विज्ञायत इति राजयोगगेति- सम्बुध्दिरुदिता- वाद्यं सुष्ठु जानाति भक्तकृतं प्रीत्येति तस्य सम्बुध्दिः हे राम- आद्य-आसमन्तात् – पश्य – एहि- वन्द्यः- सत्पादः यस्य सः तथाविधश्च स्वराट्च – असि - मममखाः – चक्रिणि विष्णौ – क्रियाः – येषां ते – यथा भवन्ति – तथा देहि- द्रव्यतपोयागादि सकल मदीय मखानां – त्वयि- विष्णौ समर्पणेन सार्थक्यं यथा स्यात्तथा मयि – अनुग्रहः कर्तव्य इति भावः – अस्मिन् श्लोके - यथाक्रमं – युग्माक्षर परिगणनेन – श्रीमद्भागवत प्रथमस्कन्ध - द्वितीयाध्यायस्थितः

श्लोः “वासुदेवपरावेदा वासुदेवा परा मखाः ।
वासुदेव परा योगा वासुदेव परा क्रियाः ।।”
इति श्लोकः प्रतीयते इति शिवम् ।

अथ सङ्कीर्णपादश्चतुर्थः

अथ रथबन्धः अचवर्णञ्च

श्लोः श्रीवाग्वामन वसुदप्रकटितदेवादिगतदयसुवर्ण्य ।
कृपया मां पाहि नमोस्तु तव हर प्रबल सिद्धाम्हः ।।

व्याख्याः- प्रबलं च तत् सिद्धञ्च तत् अम्हः हि पञ्च- प्रबलसिद्धाम्हः – तत् – हर – अस्मिन् रथबन्धे श्रीवासुदेवनरसिंहः इति प्रतीयते।

				श्री				
			वाक्	वा	म			
		प्र	द	सु	व	न		
	क	टि	त	दे	वा	दि	ग	
या	प	कृ	र्ण्य	व	सु	य	द	त
	मां	पा	हि	न	मो	स्तु	त	
		ब	प्र	र	क	व		
			ल	सि	द्धा			
				म्हः				

अथ चक्र बन्धः

श्लोः स श्रीमद्गुरुदेव रामपरमात्मावत्वथर्जुस्सदा
लक्ष्म्युल्लिप्त सुगन्ध मंजु मञ्जु परमश्री लाङ्गकोऽनातुरः।
भक्त्या कामितदः सहेमपटवन्मूर्तिर्महाख्यातिमान्
मान्योदा सिहतो लसच्छुभकरो दामोदरः कान्तिमान्।। 17

व्याख्याः-अवतु-अथ-ऋजुः इति पदच्छेदः । लक्ष्म्युल्लिप्त सुगन्धमञ्जूनि - परम श्रीलानि-परम लक्षणानि-अङ्गानि यस्य सः-अस्मिन् चक्रबन्धे - द्वितीयवलये राम हे मामक इति प्रतीयते- सप्तमे वलये "मल्लिकार्जुनाख्या" इति प्रतीयते ।

अथ चक्रबन्धः पादाभ्यासयमकञ्च

श्लोः मन्ये मद्धृदि वासुदेवमभवं देवं समर्जुं पुरा
लक्ष्म्युल्लिप्त सुसन्दरैण मदकं तं भक्तितोऽनागसम् ।
मच्छ्रीकाममुदेलमर्यमगतं राजत्सु सङ्ख्यादिमं
मच्छ्रीकाम मुदेलमर्यमगतं राजत्सु सङ्ख्यादिमम्।। 18.

व्याख्याः - श्रियं-लक्ष्मीं- कामयत इति श्रीकामः-विष्णुः मम श्रीकामः - मच्छ्रीकामः - मच्छ्रीकामेत्यनेन दासस्य – मम स्वामी-विष्णुरित्यभिप्रायो गम्यते–प्रेमातिशयादयं –विष्णोर्मम मच विद्यमानसम्बन्धः प्रतिपादितः-उक्तं च पारात्तु तच्छ्रुतेरित्यत्र-भाष्ये –जीवनियन्तृत्वमीशस्य-ननु-अंशो नानाव्यपदेशादित्यत्र-अंशांशि भावः जीवेशयोः प्रतिपादितः – सत्यम् - अत्यल्प-मिदमुच्यते - आत्मेति यापगच्छन्ति ग्राहयन्ति चेत्यत्र-अत्यन्ताभेद एव प्रतिपादितः – एवमप्यौपाधिकं भेदमविद्यावस्थायां- कल्पितं स्वीकृत्य – स्वामिभृत्यन्यायः

परजीवयोस्स्यात् – उक्तं च श्रीशाङ्करभाष्ये – अपि च स्मर्यत इति सूत्रे- निरतिशयोपाधि सम्पन्नश्चेश्वरो विहीनोपाधिसम्पन्नान् जीवान् प्रशास्तीति-तस्मादुक्तं–रमणीयं – तस्य मुदे-सन्तोषाय-अलं – पर्याप्तं - मद्बुदिमन्य इत्यन्वयः - अर्यमगतं-सूर्यमण्डलमध्यवर्तिनं-राजतां सुसङ्ख्यानां-सुविचारणानां – जगज्जीवपरमात्म – विषयक - विचारणानामित्यर्थः आदिमं - मम-श्रीः-मच्छ्रीः-तां कामयत इति-मच्छ्रीकामा-मुत् यस्य सः-मच्छ्रीकाममुत् आसमन्तादिरा-वाक्-यस्य सः-एरः-रलयोरभेदः-एलः-यथा भगवद्वाक्यं-सर्वतो व्याप्तं - तथाशान्येषां वाक्यं - अतस्स एलः मच्छ्रीकाममुच्चासौ - एलश्चेति विशेषणोभयपद कर्मधारयः तम् आद्यं स्वामिनम् - अगतं-गतिरहितम्-अचलत्वात्-राजतां-प्रकाशमानां-सुसङ्ख्यासु-आदिमं एवमुत्तरार्धं व्याख्यातं पूर्वार्धं तु सुगमम्- अस्मिन् चक्रबन्धे-चतुर्थवलये "वासुदेवं भज" इति, सप्तमे "मल्लिकार्जुनाख्या" इति प्रतीयते ।

अथ पुनः दशविधन्यासयुक्तचक्रबन्धः

श्लोः सप्रेमज्ञ स योऽव वासुर सुरश्रीरःसमर्जुःकवे
त्वं मल्लिप्तसुगन्धसुन्दरवहप्रेक्षस्वमे नामश ।
सुश्रीका समभोगतेऽररदरेयः स्वस्थशख्यातवि
द्वित्तावा सबुधत्वभक्तिसुखदे वेद्ये हृदस्त्वर्थवित्।। 19

व्याख्याः– सः यः आशवा-इति छेदः-सुर शिर-कवे-कविं-पुराण मनुशासितारम् – इत्यस्ति – श्रीकृष्णगीता - प्रेम्णा-त्वय्येवेत्यर्थः- सहवर्तन्त इति सप्रेमाणः-तान्-जानातीति तस्य सम्बुध्दिः - स प्रेमज्ञ - मल्लिप्त सुगन्ध सुन्दर – मे - मह्यं नामतवैवेत्यर्थः ददातीति तस्य सम्बुद्धिः विष्णो यः श्रीरः -

रलयोरभेदः-श्रीलः-लक्ष्मीवान्-समः--निर्विशेषश्चासौ रुजुश्च-समर्जुः-अव-रक्ष-वा वः-प्रेक्षस्य च वा-हे सुश्रीक-स्वस्मिन् तिष्ठतीति तस्य सम्बुध्दिः - स्वस्थ-स्वे महिम्नि तिष्ठतीत्यर्थः श्रीविष्णो यः – ख्यातैः - प्रसिद्धैः विद्भिः पण्डितैः सर्वोत्तम पण्डितैरित्यर्थः तैस्सहवर्तत इति स ख्यातवित्- शसयोरभेदः शख्यातवित् – तस्मिन् - आसमभोगदे - मोक्षप्रद इत्यर्थः आररवमिव - कवाटमिव - दरश्चक्रं यस्य तस्मिन् – वित्तावासबुधत्वभक्तिसुखदे - वेद्ये-त्वयीत्यर्थः। अर्थवित्हृत् - अस्तु-ममेत्यर्थः - अस्मिन् चक्रबन्धे-प्रथमवलये "सुन्दरशिवद" इति प्रतीयते- तस्मिन् कर्णिकाक्षरे संयोजिते सति-"सुन्दरशिवदर" इति प्रतीयते। द्वितीयवलये "वासुदेव हरे" इति प्रतीयते। तृतीयवलये-वबयोरभेदः "बन्धगश्रीप्रेयः" इति प्रतीयते। चतुर्थवलये "योगभोरक्षस्व" इति प्रतीयते- योग-योगात्मन् भोः- रक्ष-पाहि-स्व-आत्मीयेति तदर्थः। पञ्चमे वलये "ससुमसस्वस्थ" इति प्रतीयते। षष्ठवलये "ज्ञप्तसमवेश" इति प्रतीयते। सप्तमवलये "मल्लिकार्जुनाख्या" इति प्रतीयते । अष्टमवलये "प्रेमश्रीकमत" इति प्रतीयते । नवमवलये "सत्यं सुवेदवित्" इति प्रतीयते ।

श्लोः देवश्रीवत्सवत्सोदि शतुशमशतं- ज्ञानमानन्दनद्यां
स्नानं जानन्ननीं तोममषिमलमतिन्धाम नामस्वमत्य।
तं वन्दे वन्द्यं गुरुमुरुकरुणावालमालग्नलक्ष्मी
क्षोणीवेणीघृणीनां किल जलदलसद्रूपमापप्रसम्बैः।। 20.

व्याख्याः– श्रीवत्सवत्सः श्रीवत्सोराः-अजः-अभाव्याप्तिरर्थः-अलग्नाश्च ते लक्ष्मीक्षोणीवेणी - घृणयश्च-तेषां प्रसम्बैः किल-जलदलिसद्रूपमापेत्युत्प्रेक्षा ।

अथ पुष्पमालिकाबन्धः



अथ गुच्छबन्धः

अचवर्गं-आपवर्णं-छेकानुप्रासश्च यथा

श्लोः दासार्धसाध्यस्सानन्दनन्दनन्दनवल्लवः ।
सेवयावी तु वस्सैव सादरोदक्ष दक्षिणः ।। 21.

व्याख्याः– सः-एव- इति-पदच्छेदः -सोचिलोपेचेत्पादपूरणमिति सुलोपः-वल्लवः-गोपः दक्षः समर्थः-दक्षिणः-उदारः दक्षश्चासौ-दक्षिणश्चेति-विशेषणोभयपदस्समासः-

सङ्कीर्णपादश्चतुर्थः

अथ गोपुरबन्धः निर्दन्त्यं वृत्त्यनुप्रासश्च

श्लोः गुरुरुरुगुण राराजच्चरणमहाब्दो रघुप्रवरः ।
हरिरच्छोरोचिष्णुश्चक्री करिरक्षकश्श्रीशः ।। 22.

व्याख्याः– अस्मिन् गोपुरबन्धे गुरुरामहरिरिति प्रतीयते ।

गोपुरबन्धः



अथ नागबन्धः

श्लोः रामं श्रीमद्गुणश्रीविलसितमहमद्यैव सत्पद्यहृद्यै
रम्भोधिस्थानभङ्गप्रमहितकृतवाग्जालवित्तैरथैव ।
स्तोत्रैस्त्वां हृष्टचित्तोऽधिकमनमम नुन्नाङ्गगौण प्रभाभिः
सिद्धैरन्नुत्पथेऽत्रैव खलु खलरताश्चिन्तनन्द्राग्नुकामम्।। 23

व्याख्याः- अधिकम्-अनमम् इति पदच्छेदः-अनुन्नाङ्गाः-अविद्धाङ्गाः-द्यधावयवाः-इतियावत्-ताश्च ताः गौण्यश्चताः प्रजाश्च ताभिः-अङ्गगात्रकण्ठेभ्यो वक्तव्यमिति वार्तिकसिद्ध ङ्षो वैकल्पिकत्वात्-अनुन्नाङ्गा इत्युक्तं-समक्-इदं कर्तृपदं-उत्पथे चिन्तनम्-इदं-प्रथमान्तकर्मपदं-सिध्दयैरन्-षिधु-गत्यामिति धातोः ख्वादिस्थाद्विधिलिङि भावकर्मणोरिति सूत्रेणात्मनेपदे सार्वधातुके यगिति यक् प्रत्यये रूपम् । अयं कर्मणि प्रयोगः। षिध संराद्धाविति दैवादिक धातु वस्तुरूपमन्यथा स्यात्-अतो दैवादिको नात्र गृह्यते। खलरतास्तु। अत्रैव -उत्पथे-एवेत्यर्थः-द्राक् चिन्तनं-सेधेयुः नु खलु- सिध्दयैरन्नित्यस्य परस्मैपदिरतया विपरिणामेनचिन्तनमित्यस्य द्वितीयान्तत्वग्रहणेन चान्वयः- अयं तु सकर्मकप्रयोगः- एवं गौणप्रजानामुत्पथे सचिन्तनत्वं-खलरतानान्तु - उत्पथे एव–प्रकामं– न चिन्तनत्वं–चाभिहितं – तस्मान्मम तादृशी - गतिर्मास्तु-राममेवाश्रये इति सर्वातिशायि व्यङ्ग्यं सिद्धं भवति ।

सङ्कीर्णपादश्चतुर्थः

नागबन्धः



अष्टदलपद्मबन्धः

श्लोः या भा विष्णुर्धृतख्यात्यति विमलगुणाद्वारभक्ताऽसमाया
या मा सक्ता भरद्वाजमुखनुतहरौ ज्ञायनुज्ञा ऽरमेया ।
यामे प्रज्ञा सयज्ञाभ्यधिकहरिरतीस्तीरविद्याददाया
यादादद्याविरस्तीश्वर इह दयया ख्यातविष्णुर्विभावा।। 24

व्याख्याः- या मा लक्ष्मीः धृतिख्यातिश्च सा-अतिविमल गुणा च-द्वारे-स्थिता भक्ताः यस्यास्सा- या असमाया-भरद्वाज मुखनुतौ हरौ सक्ताज्ञानानाम्-अयान् शुभावहविधीन्-सुष्ठु जानातीति ज्ञायसुज्ञाः-या अप्रमेया-निर्गुणत्वात्-ददातीति-ददाती रस्य पादस्य संसृतिहरस्येत्यर्थः - विद्यानां च ददा - यद्वा-तीरस्य सेतोः-सेतुसदृशस्य -श्रीविष्णोरित्यर्थः विद्यायाः ददा-अमृतस्यैष सेतुरिति श्रुतेः-या-मे मह्यं प्रज्ञासुयज्ञाभ्यधिकहरिरतीः- आदात्- या विभा- विशेषतो भातीति विभा- अथवा- विशेषाभा दीप्तिः यस्यास्सा-विभा-तस्याः- लक्ष्म्याः दयया इह- अद्य-ख्यातधृष्णुः ईश्वरः-भा युक्तश्चासौ विष्णुश्च भाविष्णुः आविरस्ति ।

सङ्कीर्ण पादश्चतुर्थः



सङ्कीर्णपादश्चतुर्थः

अथ षोडशदलपद्मबन्धः व्यपेतयमकञ्च

श्लोः दत्तोदयोदयं दत्ताद्दत्तोदग्रदशोदमम् ।
दध्योदनोदक ददो दक्षादभ्रदयादरः ।। 25.

व्याख्याः- दत्तः श्री दत्तात्रेयः दयायाः उदयम् आविर्भावं-दमं च दत्तात् ।



अथ गोमूत्रिकाबन्धः

व्यपेतयमकं छेकानुप्रासश्च

कमलामलसल्लाप कमनीयाननस्मितम् ।
कमलास्यं लसल्लास्यं कमनीयं नतोस्मि तम् ।। 26.

अथ पुनः गोमूत्रिकाबन्धः-अव्यपेतव्यपेतयमकञ्च

श्लोः मां वत्स वत्सं वशवर्ती वन्द्यकर वल्लव ।
श्रीवत्स वत्स वरवण्यावदेव शिवं तव ।।

व्याख्याः - हे वन्द्यवर वल्लवगोप श्रीवत्सः- वत्से वक्षसि यस्यन्तस्य सम्बुद्धिः वरैः श्रेष्ठैः-वर्ण्य-वत्स वत्सं मां-वशवर्ती सन् अव-रक्ष-हे देव तव शिवं-अस्त्विवतिशेषः ।

व्याख्याः-हे वन्द्यवर वल्लवगोप श्रीवत्सः वक्षसि यस्यन्तस्य सम्बुद्धिः वरै श्रेष्ठैः-वर्ण-वत्स वत्सं मांवशिर्तीसन् आव-रक्ष-हेदेव तव शिवं- अस्त्विवति शेषः।

अथ पुष्पमालिकाबन्धश्छेकानुप्रासश्च

श्लोः रामाश्यामाऽसमाते सपदिपद दे भक्तिभूति प्रतिष्ठान्
भादेयाद्देवदेव प्रवरवर वधूप्रेमधामद्युमर्धृत् ।
कामं प्रेम प्रमग्नापि सनयनयन कैर्यां महामञ्जु मच्छां
नूनं जानन्त्यनन्तां शिवदवनवने श्रीहरे हंस हंसाः ।।

व्याख्याः- देवदेवप्रवर – वरवधूः – लक्ष्मीः – तस्याः प्रेम धाम च तत् – द्युमच्चेति -विशेषणोभयपदः- वरवधूप्रेम धामद्युमत्-हृत्-यस्य तस्य सम्बुध्दिः श्रीहरे-रामा अभिरामा-श्यामानीला-असमादे तव- भाध्युतिः-सवदिपदयोः-हिदयोः तवैवेत्यर्थः-पदे-स्थाने-भक्तैर्भूतिः-ऐश्रवर्यं यद्वा - भक्तिर्भूतिरिव-भक्तिभूतिः-तस्याः प्रतिष्ठां - यद्वा-भक्तिभूत्योः प्रतिष्ठां देयात्- यां-शिवदं च तत्-ननमिव-वारीव-वनं- अरण्यन्च - तस्मिन् हंसा इव हंसाः - परमहंसाः - जानन्ति-शिवप्रदवारि तन्निर्मले अरण्ये स्थिताः - हंसा इव शोभया शोभिताः-परमहंसा इति-तात्पर्यम्-अस्यां पुष्पमालिकायां - मापतिदेव-मम नमनं वह इति प्रतीयते ।

अथ पुष्पमालिकाबन्धः



सङ्कीणर् पादश्चतुर्थः

अथ कुलालचक्रबन्धः अर्थाभ्यासयमकञ्च

श्लोः य दहोऽवशिवामे ययमेवासि महोदय ।
यदहो वशिवामेय यमेवासि महोदय ।। 27

पदविभागः-यदहः-अव-शिव-अमेय-यम्-एव-असि-महोदय-यत्-अहो-वशिवामे-अययमेवासि-महोदय।

व्याख्याः-दय – शिव -अमेय-महान्-उदयः आविर्भावः–यस्य तस्य सम्बुद्धिः- अय यमे शुभावह विधियुक्ते यमाख्ये योगे-वसते-इति-आययमेवासिन्यौ शयवासेत्यादिना अलुक्-महः तेजश्च दया च-महोदये-अययमेवासिन्यौ-महोदये यस्य तस्य सम्बुद्धिः- त्वं-यमेव भक्तं-प्रति असिभवसितं–अव–यत्–यस्मात्-कारणात्-यदहः-यद्दिनं-वशिनां- जितेन्द्रियाणां- वामे मनोज्ञे-त्वयि भवतीति शेषः-तत् अहो आश्चर्यं भगवद्योगाभ्यासेन-भगवत्कृपैकलभ्येनभक्तो विस्मय माप्नोत्यहोरात्र सन्ततेनेत्यनेभिप्रायश्शिवङ्करः।

अथ कुलालचक्रबन्धः

अथ अर्धभ्रमबन्धः

श्लोः हरे तव यशोऽपिश्री रेजे तादृशधीष्वपि ।
तदा दृशा येनाधीशोऽवदृशा हृदयेशय ।। 29.

व्याख्याः– हृदयेशय-हरे–तव यशः श्रीरपि – तादृशानां-यशस्विनां श्रीमतां चेत्यर्थः-धीष्वपि-तता-व्याप्ता-सती रेजे येन कारणेन दृशा-इदं प्रथमैकवचनमत्र गृह्यते-दृग्रूपः नान्यतोऽस्ति द्रष्टा इति श्रुतेः-अधीशश्च-एष सर्वेश्वर इति श्रुतेः-तेन कारणेन-दृशादृष्ट्या-अव-रक्ष ।

अथ त्र्यक्षरं पूर्णभ्रमबन्धश्च स एव सर्वतोभद्रबन्ध इति नाम्ना प्रसिद्धः

श्लोः सुवासवा वासवासु वास दासु सुदासव ।
सदा वदे देवदास वासुदेव वदेसुव ।। 30.

पदविभागः- सुवास-वा-वासवा सुवासद-आ-सुसुदास-वा-सदा ।
वदेत्-एव-दास-वासुदेव-वदेषु (सषयोरभेदः) वा

व्याख्याः- वदेषु–वक्तृषु–दास–हेभगवद्दास–सुवास– सुनिवास –इति वा–वासवस्य - असुवासौ-प्राणनिवासौ - ददातीति तस्य सम्बुद्धिः- वासवासु-दासद इति वा-समीचीनाः-शोभनाः-दासाः-यस्य तस्य सम्बुद्धिः सु सुदास इति वा-वासुदेव-इति वा-सदा-आसमन्तात् वदेदेव-"योगी युञ्जीत नततमात्मानां रहसि स्थितः"- इत्यादाविव–विधिरतोभिहितः-ननु सिद्धे ब्रह्मणि-तद्बोधे वा विधिः कथं सम्भवति-वस्तुतन्त्रत्वात्-सत्यं-योगी युञ्जीत सतत मित्यत्र – ध्यानस्योक्तत्वात् – तस्य मानसक्रियारूपत्वात्

कर्तृतन्त्रत्वेन - ध्यानविषयाविधिः - यथोपपद्यते - वस्तुतन्त्रज्ञानस्य अनुक्तत्वात् - तथैवास्मिन् मदीये श्लोके जपविषया विधिरुपपद्यते- स्यादेतत्-अत्रेयमाशङ्का-वस्तुतन्त्रे ज्ञानेऽपि विधिस्सम्भवति- "आत्मा वा अरे द्रष्टव्य" इति श्रुतौ द्रष्टव्य इति विधेरुक्तत्वात्, श्रीयाज्ञवल्क्य श्रुतावपि-ध्यानयोगेन सम्पश्येत्-सूक्ष्म आत्मात्मनि-स्थितः इति विधेरुपलभ्यमानत्वात् इति। तन्न - दर्शनाच्चेति सूत्रे – श्रीशाङ्करभाष्ये – तट्टीकासुच - द्रष्टव्यादीनां ज्ञाने विधिप्रत्ययानां गतेः उक्तत्वात् – तत्र द्रष्टव्यं –अत्र कश्चिदधिकांशो लिख्यते-"बुद्ध्या युक्तो यमा पार्थ कर्मबन्धं प्रहास्यसि" इत्यादौ तु यद्यपि विधिर्नोपलभ्यते - तथापि योगबुद्धेः कर्मबन्ध प्रहाण साधिनीत्वरूपसंयोगस्य अपूर्वत्वात् - अवान्तरवाक्यभेदेन विधिः स्वीक्रियते - श्रीपूर्व मीमांसायां प्रथमतन्त्रे "पौष्णपेषण"मितिसूत्रे यथा विधि स्वीकृतः तथेति शिवम् ।

श्री पञ्चाक्षरबन्धः

श्लोः विधीन्द्रविनुतं विश्वभाविराकाविधुच्छवि ।
गौरीविभ्रमविख्यातं शाङ्करं वस्तु संस्तुमः ।। 31.

तं	शा	न्द्र	ङ्क	तं
मः	ख्या	धी	नु	रं
म	भ्र	वि	श्व	भा
स्तु	गौ	धु	रा	व
री	सं	च्छ	न्तु	का

अथ मुक्तागुच्छबन्धः

श्लोः श्रीधरन्धराधरारि सोदरं दयाकरं रञ्जितामरम् ।
मुदासदावदान्यशेखरं रञ्जिदङ्घ्रिकिङ्किणीरवायि
तागमस्वरं रञ्जयामि मानसे पदानतेन्दुशेखरम्।। 32.



स्व	जि	जि
म	ता	या
ग	म	मि
ता	रं	मा
यि	मु	न
वा	दा	से
र	स	प
णी	दा	दा
ङ्कि	व	न
कि	दा	ते
ङ्घ्रि	न्य	न्दु
दं	शे	शे
जि	रं	ख

अथ आन्दोलिकाबन्धः

श्लोः श्रीविद्याशालिविद्वत्क्षितिपतिकृतिनो वासवासत्प्रसन्नाः
स्वारादा रामराजद्रुमसुमसमनो हर्षदास्सत्फलाढ्याः ।
द्वन्द्वान्यस्थैर्यसर्गाः हरिपदकमल प्रेर्यमाणर्धिजाताः
पान्त्वस्मान्भक्तकल्पान्-समरसकृपा पद्मिनीभानुमन्तः।। 33.



अथ चामरबन्धः

श्लोः श्रीमदमन्दमहं रघुरत्नं भाविमिविश्वविभुं कृतकृत्यम् ।
कृष्ण सरोज विलासि ललामं लास्यति यत्र सदावनिबाला।। 34



अथ पुनश्चामरबन्धः

श्लोः यस्संसारनगोच्छेददåभोळिः कविताभयः ।
दया ततमते तेस्यादमरेशः सशर्मदः ।। 35.

श्लोः मतिमान्माननोदग्रमतिवैभववाग्रस ।
महीशत्वां सदाऽनुग्रमहाः पायाद्धरिर्नुसः ।। 36.

अथ श्री छत्रबन्धः

श्लोः जयजीव महाराजः जगज्जीवनसुप्रजः ।
तव वज्रयतात्सारं तमनन्तं परात्परम् ।। 37.

द्विचतुष्कचक्रबन्धः

श्लोः तनोतु ते रमाकान्तः शरच्छन्द्र नुतं यशः ।
तनोतुलरसैः काव्यैः समाच्छविनुतोयतैः ।। 38.

द्विचतुष्कचक्रबन्धः

चतुरश्रचक्रबन्धः कुलालचक्रबन्धश्च

श्लोः सारसावास सरसा सारसध्वस्त राक्षसा ।
साक्षारास्ताद्धुतायासा साऽऽयाताय सहिरसा ।। 39



अथ श्री ब्रह्म मण्डलबन्धः

श्लोः धरा धारा धारा धराकारमूर्ते कृपापार पाहि कृतिस्थैर्यहारिन्।
दमोदार दामोदर श्रीमुरारे नुताभीरभीतानुमोदस्यरालुन्।। 40



अथ सरोवरबन्धः

श्लोः सुधीमतिमराल्ल्यसौ तवसमर्जुविख्यातव
त्कृपामविरतं वदेल्लसदकैतव प्रज्ञया ।
नमाम लसतु स्वयं भवदनल्पमार्गं भव
त्प्रणामसुलभं वदाज्ञवशसाभवच्छिच्छिवा ।। 41.



अष्टमुखनागबन्धः

श्लोः सुखकर भासुर गुणगण
समेत विष्णो लसद्गुरु वरमे ।
सततं दिश परमेश्वर
शुभानि सुरवीरप विततकीर्तितते ।। 42.



अथ चतुरङ्गबन्धः

श्लोः सदादय परामांश्री शुभपातुहरेमत ।
हसाव भावस्थदयाऽपारारामा सदाज्ञगा ॥ 43

(अं यं तुरङ्गपदोद्धृतश्लेकः)

व्याख्याः- हसेन-अवभातीति-हसावभ-अवस्थायस्य-

೧ ऋ	೩೦ दा	೯ शु	೨೦ भा	೩ द	೨೪ याऽ	೧೧ पा	೨೯ रा
೧೬ त	೧೯ व	೨ दा	೨೯ स	೧೦ भ	೨೬ रा	೪ य	೨ द
೩೧ ज्ञ	೭ श्री	೧೮ ह	೧೪ रे	೨೧ व	೬ रा	೧೫ पा	೧೨ तु
೧೭ सा	೧೫ म	೩೨ गा	೮ मां	೨೭ म	೧೩ ह	೨೨ स्थ	೫ प

अथ गरुडगति चक्र बन्धः

श्लो   मारमाताहि भात्युग्ररवि माहिदभाग्रमा ।

मानिताविधि भीतानां हृतदुर्लत्युरुश्रमा   ।।   44.

अथ कर्ता (र्तृ) – कर्म – क्रिया गोपनम् यथा

श्लो भक्त कल्पलता भूरि प्रभावन्त्यागमोदिताः ।
जगदीशस्य ते विष्णो श्श्रीकरास्सुन्दरा श्शुभाः ।। 45.

अथ पृथग्विध - बहुवृत्त गर्भ - पृथ्वीवृत्तम्

श्लो हरे सुगुणसंयुतस्थिरगुरो प्रभो देहि नः
सखानियति सत्पते स्फुटरुचिं सनादोदय ।
कलेश विविदार्थकृज्जय दिशज्ञका राजितः
प्रभाविलसितादिम प्रमहितस्थ भूमापते ।। 46.

अस्मिन् पद्ये पादे पादे प्रथम-द्वितीय-तृतीय-चतुर्दश वर्णानाम् परित्यागेन "**मञ्जुभाषिणीवृत्तं** " यथा

श्लो गुणसंयुतस्थिरगुरो प्रदेहि नो
यति सत्पते स्फुट रुचिं सदोदय ।
विविधार्थ कृज्जय दिशज्ञराजितः
लसितादिम प्रमहितस्थ मापते ।। 1.

व्याख्या- प्रमहितेषु तिष्ठतीति तस्य सम्बुद्धिः प्रमहितस्थ - तस्मिन्नेव पृथ्वीवृत्ते पादे पादे त्रयोदशादि सप्तदशान्त वर्णानां परित्यागेन "**जलोद्धतगतिवृत्तं**" यथा

श्लो हरे सुगुण संयुत स्थिरगुरो
सुखानियति सत्पते स्फुटरुचिम् ।
कलेश विविधार्थ कृज्जयदिश
प्रभाविलसितादिम प्रमहित ।। 2.

तस्मिन्नेव पृथ्वीवृत्ते पादेपादे प्रथमादिपञ्चमान्तवर्णानां चतुर्दशवर्णस्यच परित्यागे "**रथोद्धतावृत्तम्**"

श्लो संयुत स्थिरगुरो प्रदेहि नः
सत्पते स्फुट रुचिं सदोदय ।
अर्थ कृज्जय दिशज्ञ राजित
तादिम प्रमहितस्थमापते ।। 3.

व्याख्याः- संयुताः – स्थिरा - भूमिः येन तस्य सम्बुद्धिः - आसमन्तात् अर्थकृत् – जयोदिशासु - यस्य तस्य सम्बुद्धिः – ज्ञराजितत – आदिम - प्रमहितेषु तिष्ठतीति तस्य सम्बुद्धिः अस्मिन्नेव पृथ्वीवृत्ते पादे पादे प्रथम-द्वितीय सप्तमाष्टम-चतुर्दशाक्षराणां परित्यागेन "**प्रियंवदावृत्तं**" यथा

श्लो सुगुण संस्थिर गुरो प्रदेहि नः
नियति सत् स्फुटरुचिं सदोदय ।
सविविधाऽऽजय दिशज्ञ राजित
विलसिता प्रमहितस्थ मापते ।। 4.

व्याख्याः- विविधैः- आमन्तात् जयैस्सह वर्तत इति - तस्य सम्बुद्धिः सविविधाजय- शसयोरभेदात् - सकारो गृहीतः - विलसित अप्रम हितस्थ - इति पृथक्पदानि।

अथ प्रथम तृतीय पादयोः पञ्चमाद्यष्टमान्त वर्णानां त्रयोदशादि सप्तदशान्त वर्णानाञ्च परित्यागेन द्वितीय - चतुर्थ पादयोः नवमादि सप्तदशान्त वर्णानां च परित्यागेन।

अनुष्टुप् वृत्तम् यथा

श्लो हरे सुगु स्थिरगुरो सुखानियति सत्पते ।
कलेश विज्जय दिशा प्रभाविलसितादिम ।। 5.

व्याख्याः- शोभनाः - गावो-घृणयः यस्य सः सुगुः - सभासौ-स्थिरश्च- तस्य सम्बुद्धिः-सुगुस्थिर- हे कलेश-हेवित् ।

प्रथम तृतीयपादयोः चतुर्थादि वर्णत्रय-नवमादि वर्णद्वय पंचदशादि वर्णत्रयाणां ग्रहणेन - द्वितीय - चतुर्थ पादयोः तृतीयाष्टम द्वादश चतुर्दश वर्णानां त्यागेन ।

"वियोगिनीवृत्तं" यथा

श्लो गुण संस्थिर देहिनः सुखात्तं यति सत्पस्फुटरुक् सदोदय ।
विविधाऽऽजयराजितप्रभा लसितादि प्रमहिस्थ मापते ।। 6.

व्याख्याः- सुखायतीन्-सुखायामान्-सतः सत्पुरुषांश्च पातीति। तस्य सम्बुद्धिः-स्फुटरुक् प्रव्यक्तकान्ते - विविधैः आसमन्तात् – जयैः राजित –लसितश्चासौ – आदिश्चासौ – प्रकर्षेण – महिस्थश्च - तस्य स्म्बुद्धि नः -प्रभा, देहि।

पादे पादे प्रथम – द्वितीय – तृतीय – चतुर्दश - पञ्चदशवर्णानां परित्यागेन "**प्रमिताक्षरवृत्तम्**" -

श्लो गुणसंयुत स्थिरगुरो प्रहिनो
यतिसत्पते स्फुटरुचिं सदय ।
विविधार्थकृज्जयदिशज्ञ जित
लसितादिम प्रमहितस्थपते ।। 7.

व्याख्याः- लसिता – आदिमा - आदिलक्ष्मीः यस्य तस्य सम्बुद्धिः – ज्ञैःजत - प्रमहितेषु तिष्ठतीति तस्य सम्बुध्दिः – स्फुटरुचिम् – नः – प्र – प्रकर्षम् – दिश - हि

पादे पादे तृतीयादि-दशमान्तवर्णानाम्-चतुर्दश वर्णस्यच परित्यागे "**प्रमाणिकावृत्तम्**" यथा

श्लो हरे गुरो प्रदेहि नः सुखा रुचिं सदोदय ।
कले दिशज्ञ राजित। प्रभाहितस्थ मापते ।। 8.

व्याख्याः- प्रकर्षं ददातीति-तस्य सम्बुद्धिः–सुखेति च हरेः सम्बोधसंज्ञा राजितप्रभा-आ-हितस्थ-इति पृथक्पदानि-एहि-सः-आ-समन्तात्-रुचिम्-कले-कळा युग्मन्च-दिश.

प्रथम–तृतीय पादयोः प्रथमा वर्णत्रयस्य – चतुर्दशादि - सप्तदशान्त- वर्णानाञ्च – परित्यागेन - द्वितीयचतुर्थपादयोः द्वितीयवर्णवर्जं च तथैव परित्यागेन "**केतुमतीवृत्तम्**" यथा,

श्लो गुण संयुत स्थिरगुरो प्रखायति सत्पते स्फुटरुचिं सख ।
विविधार्थकृज्जयदिशज्ञभा लसितादिम प्रमहितस्थ ।। 9.

व्याख्याः- भिस्य-आकाशस्य-आयतिरिव आयतिः आयामः यस्य सः खायतिः सचासौ सत्पतिश्च-तस्य सम्बुद्धिः भालसिता-आदिमा-आदिलक्ष्मीः यस्य तस्य सम्बुद्धिः सः त्वम् -स्फुटरुचिम्- प्र-प्रकर्षम्-दिश ।

पादे पादे - चतुर्थ- पञ्चमाष्टम – द्वादश – चतुर्दश वर्णानां परित्यागेन "**वंशस्थवृत्तम्**" यथा -

श्लो हरे सुसंयुक् स्थिरगु प्रभो हि नः
सुखानि सत्पस्फुटरुक् सनादयः
कलेश धार्थोजय दिग्ज्ञराजित
प्रभाविताादि प्रमहिस्थ भूपते ।। 10.

व्याख्याः- सुसंयुजः-स्थिराः- गावः वाचः यस्यसः सुसंयुक् स्थिरगुः – स चासौ प्रभुश्च – तस्य सम्बुध्दिः- सन्तः - पातीति तस्य सम्बुध्दिः सत्प-स्फुटरुक् – स्फुटकान्ते - आदिश्चासौ-प्रमहिस्थश्च तस्य सम्बुध्दिः यः कलाश्च ईशाश्च ददातीति कलेशधः अतोनुपसर्गेक इति कः- तस्य सम्बुध्दिः-नः अस्माकम्-अर्थः वस्तु - परवस्त्विति यावत् – य़ः – स – एव – सुखानिहि - विचारवताम्-अस्मादृशानां परवस्तु व्यतिरिक्त सर्ववस्तूनि – सुखाभासानीति भावः-

पादे पादे चतुर्थपञ्चमाष्टम – द्वादश – चतुर्दश –सप्तदश वर्णानां परित्यागेन **"उपेन्द्रवज्रावृत्तम्"** यथा

श्लो हरेसु संयुक् स्थिरगु प्रभोहि
सुखानि सत्प स्फुटरुक्सनाद ।
कलेशधार्थो जयदिग्ज्ञराज
प्रभाविताादि प्रमहिस्थ भूप ।। 11.

व्याख्याः- पूर्वोक्तवंशस्थवृत्तार्थो अनुसन्धेयः ।

प्रथम तृतीय पादयोः प्रथम – द्वितीय – तृतीयवर्णानां त्रयोदशादि - सप्तदश वर्णानाञ्च परित्यागेन द्वितीय चतुर्थपादयोः चतुर्दशादि – सप्तदशान्त वर्णानाञ्च परित्यागेन।

गीतिवृत्तम् यथा

श्लो गुणसंयुत स्थिरगुरो सुखा नियत सत्पते स्सुटरुचिं सः।
विविधार्थकृद्दि दिशप्रभा विलसितादिम प्रमहितस्थ।। 12.

व्याख्याः- प्रभा-विलसिता आदिमा-आदिलक्ष्मी-यस्य तस्य सम्बुध्दिः

प्रथम - तृतीयपादयोः पूर्वोक्तवत्परि त्यागेन द्वितीय चतुर्थ पादयोः द्वादशादि सप्तद शांत वर्गानां परित्यागेन।

उपगीति वृत्तम् यथा

श्लो गुण संयुत स्थिरगुरो सुखानियत सत्पतेस्स्फुटरुक् ।
विविधार्थ कृज्जय दिशप्रभा विलसितादिम प्रमहि।। 13

व्याख्याः- आदिमा-आदिलक्ष्मीश्च प्रमाच आदिमप्रमे-प्रभाविलसिते आदिम प्रमे यस्य तस्य सम्बुध्दिः

प्रथम तृतीय पादयोः पूर्वोक्तवत्परित्यागेन द्वितीय चतुर्थपादयोः चतुर्दश पंचदशाक्षर परित्यागेन ।

आर्यागीतिवृत्तम् यथा

श्लो गुण संयुत स्थिरगुरो सुखानियत सत्पते स्सुटरुचिं सदय।
विविधार्थकृज्जय दिश प्रभा विलसितादिम प्रमहितस्थपते।। 14

व्याख्याः- प्रथमतृतीयपादयोः प्रथमादित्रय-अष्टमादित्रय-चतुर्दशवर्णानां त्यागेन, द्वितीयचतुर्थपादयेः प्रथमादित्रयाष्टम-द्वादशचतुर्दशवर्णानां परित्यागेन

वैतालीयवृत्तम् यथा

श्लो गुणसंयुगुरः प्रदेहिनो
यतिसत्पस्फुटरुक्सदोदय ।
विविधार्थ दिशज्ञ राजित
लसितादिम प्रमहिस्थ मापते ।। 15.

व्याख्याः- गुणसंयुक्च तत् उरः हृदयञ्च गुणसंयुगुरः- शः-प्रदेहि-यतीन् सत्पुरुषांश्च पातीति सम्बुध्दिः विविधा-अर्थाः दिशासु येषां ते विविधार्थदिशाः तेच ते ज्ञाश्च - तेषु राजित-लसितश्चासौ प्रकर्षेण महिसश्च तस्य सम्बुध्दिः।

प्रथम तृतीयोपादयोः सप्तमादि षड्वर्णानां चतुर्दश वर्णस्य च परित्यागेन, द्वितीयचतुर्थपादयोः – चतुर्थ – पञ्चमाष्टमादि त्रय-चतुर्दश वर्णानां परित्यागेन ।

दक्षिणान्तिकावृत्तम् यथा

श्लो हरे सुगुण सम्प्रदेहि नः
सुखानि सत्प रुचिं सदोदय ।
कलेश विविधाज्ञ राजित
प्रभाविताादि हितस्थ मापते ।। 16.

व्याख्या- विविधाश्च ते-आसमन्तात् ज्ञाश्च तेषु राजित ।

अथ श्री कङ्कण बन्धः

श्रीमद्भूमाराड्वादीना स्वः सद्धाधी गोराजज्ञे ।
यस्य श्रीरामोक्षं तेने शोभा विद्यायुक्तष्पज्ञः ।। 1.

व्याख्याः- सन्तः - समीचीनाः दिव्या इत्यर्थः - कान्ति प्रज्ञावाक्सम्पदः यस्य तस्य सम्बुध्दिः - हे सद्धाधीगोराः – हे योगसिद्धेत्यर्थ– ते–तव - श्रीमत् अक्षम् इन्द्रियम्-यः–जज्ञे– उक्तं च भगवद्गीतासु - यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेवेति - सः भूमा परिपूर्ण परमात्मा – निर्णीतञ्च – तथा - श्री सूत्रकारैः भूमासम्प्रपादादित्यत्र – राट् – राजा - वादीनापुरुषः क्षरपुरुषोऽ क्षरपुरुषश्चेत्यर्थः -ईशः ना-उत्तमः पुरुष इत्यर्थः–स्वः–आत्मीयः– भाविद्यायुक्तः– षज्ञः –सषयोरभेदः–सज्ञः पण्डितयुक्तः-श्रीरामः।

अस्मिन् कङ्कणबन्ध श्लोके द्वितीयाक्षरादि प्रथमाक्षरान्तं पठिते सति।

द्वितीयश्श्लोकः-

श्लो मदभूमाराड्वादीनास्वः सद्धाधीगो राजज्ञेयः
सश्रीरामोक्षन्तेने शोभाविद्या युक्तो षज्ञश्रीः ।। 2

व्याख्याः– वादीना – पुरुषः - परमपुरुष इति यावत् - स्वः आत्मीयः सत्-सत्यवस्तु-भया चेतनात्मक - स्वरुपेण – भा शब्दश्य चेतनात्मकस्वरूपार्थः श्रीमुण्डकोपनिषदि – तमेवभान्तमनुभाति सर्व मित्यत्रोपपादितः – धीगः – बुद्धिगः – उक्तञ्चान्तर्यामि ब्राह्मणे – योविज्ञाने निष्ठन्नित्यादिना – राजा चासौ ज्ञेयश्च राजज्ञेयः-सश्रीराः सम्पद्भन सहितः–विद्यायुक्तोषज्ञानां श्रीः सम्पत् - उक्तञ्च श्रीमद्भागवते - सदा सन्तुष्ट मनसः सर्वाशिवमया दिश इति – ममच - भुवः भूदेव्याश्च– मायाः – लक्ष्म्याश्च – राट् – राजा – श्री विष्णुरित्यर्थः - शोभाः मोक्षञ्च तेने-

अस्मिन् कङ्कण बन्ध श्लोके तृतीयाक्षरादि द्वितीयाक्षरान्तः पठिते सति -

तृतीयश्लोको यथा

श्लो भूमाराड्वादीना स्वः सद्भाधीगो राजो ज्ञेयस्सः।
श्रीरामोक्षन्तेने शोभा विद्यायुक्तो षज्ञश्श्रीमत् ।। 3

व्याख्याः– भूमा परिपूर्ण परमात्मा-श्रीमती च सा इरावाक्च– श्रीरा–गन्धद्विप इत्यादिवत्समासः – नादात्मक - दिव्यवाग्रूप इत्यर्थः – राट्राजादीनाम् आसमन्तात् स्वः - आत्मीयः सद्भाः समीचीनकान्तिः - धीगवोः-धीवाचोः - राजाधीगोराजः सः – तच्छब्दवाच्यः – उक्तञ्च - गायत्रीभाष्ये - तच्छब्दवाच्यं सर्वज्ञं जगत्सर्गादि कारणमिति - युक्ता उषा येन सः युक्तोषः अनिरुद्ध इत्यर्थः – स चासौ ज्ञस्च -विष्णुरिति यावत् – द्वाः - सुरलोकानि-वा – भावि - श्रीमत् मोक्षं वा देया दितिशेषः तेनेत्यस्य-

तस्मिन् कङ्कणबन्ध श्लोके चतुर्थाक्षरादि तृतीयाक्षरान्तः पठिते सति ।

चतुर्थश्लोको यथा

श्लो मारावादीनास्वः सद्धाधीगो राजो ज्ञेयस्सश्रीः ।
रामः क्षन्तेने शोभाविद्या युक्तोषज्ञः श्रीमद्भूः ।। 4

व्याख्या:- मायाः लक्ष्म्याः राट्-राजा-वादीना-पुरुषः परमपुरुष इत्यर्थः स्वः आत्मीयः सत्याभाधियौ यस्य सः-सद्धाधीः गवाम् वाचाम् राजागोराजाजः ज्ञेयः-सश्रीः-सम्पत्सहितः क्षन्ता-इनानाम् प्रभूणामीशः-यद्वा-इनस्य सूर्यस्य - ईशः अन्तर्यामी - य आदित्ये तिष्ठन्निति श्रुतेः युक्ता उषा येन सः युक्तोषा येन सः युक्तोषः - अनिरुद्ध इत्यर्थः – स चासौ ज्ञश्च – श्रीमती भू – भूदेवतायस्यसः – रामः –भा - विद्याः देयादिति शेषः–

तस्मिन् कङ्कण बन्ध श्लोके पञ्चमादि चतुर्थाक्षरान्तं पठिते सति।

पञ्चमश्लोकः यथा ।

श्लो राड्वादीना स्वः सद्धा धीगो राजोज्ञेय... सश्रीरा ।
मोक्षन्तेने शोभा विद्यायुक्तो षज्ञः श्रीमत् भूमा ।। 5

व्याख्या:- अस्यार्थः तृतीयश्लोकार्थ एव ।

अस्मिन् कङ्कणबन्धश्लोके षष्ठाक्षरादिपञ्चचमाक्षरपर्यन्तं पठिते

षष्ठश्लोकः यथा ।

श्लो वादीनास्वः सद्धाधीगो राजोज्ञेयस्सश्रीरामः ।
क्षन्तेने शोभा विद्या युक्तो षज्ञः श्रीमद्भूमाराट् ।। 6.

व्याख्या:- अस्यार्थः चतुर्थश्लोकार्थ एव ।

अस्मिन् कङ्कणबन्धश्लोके सप्तमाक्षरादिषष्ठाक्षरान्तं पठिते

सप्तमश्लोकः यथा

श्लो दीनास्वः सद्भा धीगोराजो ज्ञेयस्सश्रीरामोक्षम् ।
तेनेशोभा विद्यायुक्तो षज्ञः श्रीमद्भूमाराड्वा ।। 7

व्याख्या- अस्यार्थस्तृतीयश्लोकार्थ एव ।

अष्टमाक्षरादि सप्तमाक्षरपर्यन्तं पठिते सति ।

अष्टमश्लोकः यथा

श्लो नास्वः सद्भाधीगो राजज्ञेयः सश्रीमोक्षं ते ।
नेशोभा विद्यायुक्तः षज्ञः श्रीमद्भूमाराड्वादी ।। 8

व्याख्या- अस्यार्थः प्रथमश्लोकार्थ एव।

अस्मिन् कङ्कणबन्धश्लोके नवमाक्षरादष्टमाक्षरपर्यंतं पठिते ।

नवमश्लोकः यथा

श्लो स्वस्सद्भाधी गोराजज्ञे यस्सश्रीमोक्षं तेने ।
शोभा विद्यायुक्तो षज्ञः श्रीमद्भूमाराड्वादीना ।। 9

व्याख्या- अस्यार्थः द्वितीयश्लोकार्थ एव।

अस्मिन् कङ्कणबन्धश्लोके दशमाक्षरादि नवमाक्षरान्तं पठिते

दशमश्लोको यथा

श्लो सद्भाधीगो राजज्ञेयस्सश्रीरामोक्षं तेनेशः ।
भाविद्यायुक्तः षज्ञः श्रीमद्भूमाराड्वादीनास्स्वः ।। 10

व्याख्याः- अस्यार्थः प्रथमश्लोकार्थ एव।

अस्मिन् कङ्कणबन्धश्लोके एकादशाक्षरादिदशमाक्षरान्तं पठिते ।

एकादश श्लोको यथा

श्लो भाधीगोराजज्ञेयः स श्रीरामोक्षन्तेने शोभाः ।
विद्यायुक्तो षज्ञः श्रीमद्भूमाराड्वादीना स्वस्सत् ।। 11

व्याख्याः- अस्यार्थः द्वितीयश्लोकार्थ एव ।

द्वादशाक्षरा द्येकाद शाक्षरान्तं पठिते ।

द्वादश श्लोको यथा

श्लो धीगोराजो ज्ञेयस्स श्री रामोक्षं तेने शोभा वि ।
द्यायुक्तो षज्ञः श्रीमद्भूमाराड्वादीना स्वस्सद्भाः ।। 12.
व्याख्याः- अस्यार्थः तृतीयश्लोकार्थ एव ।
त्रयोदशाक्षरादि द्वादशाक्षरान्तं पठिते सति।

त्रयोदश श्लोको यथा

श्लो गोराजोज्ञेयस्स श्रीरामः क्षन्तेने शोभा विद्याः ।
युक्तो षज्ञः श्रीमद्भूर्माराड्वादीनास्वः सद्भाधीः ।। 13.
व्याख्याः- अस्यार्थः चतुर्थश्लोकार्थ एव ।
चतुर्दशाक्षरादित्रयोदशाक्षरान्तं पठिते सति ।

चतुर्दश श्लोको यथा

श्लो राजज्ञेयस्सश्रीरा मोक्षं तेनेशोभा विद्यायुक् ।
तोषज्ञश्री मद्भूमा राड्वादीना स्स्व स्सद्भाधीगः।। 14.
व्याख्याः- अस्यार्थः द्वितीयश्लोकार्थ एव।
पञ्चदशाक्षरादि चतुर्दशाक्षरपर्यंतं पठिते

पञ्चदश श्लोको यथा

श्लो जज्ञेयस्स श्रीरामोक्षं तेनेशोभा विद्यायुक्तः ।
षज्ञ श्रीमर्द्भूमाराड्वा दीनास्वः सद्भाधीगोराः।। 15.
व्याख्याः- अस्यार्थः प्रथमश्लोकार्थ एव ।
षोडशाक्षरादि पञ्चदशाक्षरान्तं पठिते

षोडश श्लोको यथा

श्लो ज्ञेयस्सश्री रामोक्षं तेने शोभा विद्यायुक्तोषः ।
ज्ञश्री मद्भूमाराड्वादी नास्वः सद्भाधीगोराजः।। 16
व्याख्याः- अस्यार्थः तृतीय श्लोकार्थ एव ।
सप्तदशाक्षरादि षोडशाक्षरान्तं पठिते

सप्तदश श्लोको यथा

श्लो यस्स श्री रामोक्षन्तेने शोभाविद्यायुक्त ष्षज्ञः ।
श्रीमद्भूमाराड्वादीना स्वस्सद्भाधीगोरा जज्ञेयः।। 17

व्याख्याः- अस्यार्थः प्रथमश्लोकार्थ एव ।

अष्टादशाक्षरादि सप्तदशाक्षरपर्यन्तं पठिते ।

अष्टादश श्लोको यथा

श्लो सश्रीरामोक्षन्तेने शोभा विद्यायुक्तो षज्ञश्रीः ।
मद्भूमाराड्वादीना स्वं सद्भाधीगो राजज्ञेयः।। 18

व्याख्याः- अस्यार्थः द्वितीयश्लोकार्थ एव ।

एकोनविंशाक्षराद्यष्टादशाक्षरान्तं पठिते।

एकोन विंश श्लोको यथा

श्लो श्रीरामोक्षन्तेने शोभा विद्या युक्तो षज्ञः श्रीमत् ।
भूमाराड्वादीना स्वं सद्भाधीगोराजो ज्ञेयस्सः।। 19

व्याख्याः- अस्यार्थः तृतीयश्लोकार्थ एव ।

विंशाक्षरादेकोनविंशाक्षर पर्यन्त पठिते।

विंशः श्लोको यथा

श्लो रामःक्षं तेने शोभा विद्यायुक्तो षज्ञः श्रीमद्भूः ।
माराड्वादीनास्वः सद्भाधीगोराजोज्ञेयः सश्री...।। 20.

व्याख्याः- अस्यार्थश्चतुर्थश्लोकार्थ एव ।

एकविंशाक्षरादि विंशाक्षरान्तं पठिते।

एक विंश श्लोकः

श्लो मोक्षंतेने शोभा विद्या युक्तो षज्ञः श्रीमद्भूमा ।
राड्वादीना स्वः सद्भाधीगोराजोज्ञेयः सश्रीरा ।। 21.

व्याख्याः- अस्यार्थः तृतीयश्लोकार्थ एव ।

द्वाविंशाक्षराद्येकविंशाक्षरान्तं पठिते ।

द्वा विंश श्लोकः

श्लो क्षंतेने शोभा विद्या युक्तो षज्ञः श्रीमद्भूमाराट् ।

वादीनास्यः सद्भाधीगो राजोज्ञेय स्सश्रीरामः।। 22

व्याख्याः- अस्यार्थश्चतुर्थश्लोकार्थ एव ।

त्रयोविंशाक्षरादि द्वाविंशाक्षरान्तम् पठिते ।

त्रयोविंश श्लोकः

श्लो तेने शोभा विद्यायुक्तो षज्ञः श्रीमद्भूमाराड्वा ।

दीनास्वः सद्भाधीगो राजोज्ञेयस्स श्रीरामोक्षः।। 23

व्याख्याः- अस्यार्थः तृतीयश्लोकार्थ एव ।

चतुर्विंशाक्षरादि त्रयोविंशाक्षरान्तम् पठिते।

चतुर्विंश श्श्लोकः

श्लो ने शोभा विद्यायुक्तः षज्ञः श्रीमद्भूमाराड्वादी ।

नास्वः सद्भाधीगोराजज्ञेयस्स श्रीरामोक्षंते।। 24

व्याख्याः- अस्यार्थः प्रथम श्लोकार्थ एव

पञ्चविंशाक्षरादि चतुर्विंशाक्षरान्तं पठिते।

पञ्चविंश श्लोकः

श्लो शोभा विद्या युक्तोषज्ञः श्रीमद्भूमाराड्वादीना ।

स्वः सद्भाधीगोराजज्ञेयस्स श्रीरामोक्षंतेने।। 25

व्याख्याः- अस्यार्थः द्वितीयश्लोकार्थ एव ।

षड्विंशाक्षरादिपञ्चविंशाक्षरान्तं पठिते।

षड्विंश श्लोकः

श्लो भा विद्यायुक्तः षज्ञः श्रीमद्भूमाराड्वादीनास्वः ।

सद्भाधीगोराजज्ञेयःसश्रीरामोक्षन्तेनेशः।। 26

व्याख्याः- अस्यार्थः प्रथमश्लोकार्थ एव ।

सप्तविंशाक्षरादिषड्विंशाक्षरपर्यन्तं पठिते।

सप्तविंश श्लोकः

श्लो विद्यायुक्तः षज्ञः श्रीर्मद्धूमाराड्वादीनास्वः ।
भाधीगोराजज्ञेयस्स श्रीरामोक्षं तेने शोभाः।। 27

व्याख्याः- अस्यार्थः द्वितीयश्लोकार्थ एव ।

अष्टाविंशाक्षरादि सप्तविंशाक्षरान्तम् पठिते।

अष्टाविंश श्लोकः

श्लो द्यायुक्तो षज्ञः श्रीमद्धूमाराड्वादीनास्व स्सद्धा ।
धीगोराजज्ञेयस्स श्रीरामोक्षं तेने शोभावि ।। 28

व्याख्याः- अस्यार्थः तृतीयश्लोकार्थ एव ।

एकोनत्रिंशाक्षरादि अष्टाविंशाक्षरान्तम् पठिते।

एकोनत्रिंशः श्लोको यथा

श्लो युक्तो षज्ञः श्रीमद्धूमाराड्वादीनास्वः सद्धाधीः ।
गोराजोज्ञेयस्स श्रीरामःक्षंतेने शोभा विद्याः ।। 29

व्याख्याः- अस्यार्थश्चतुर्थश्लोकार्थ एव ।

त्रिंशाक्षराद्येकोनत्रिंशाक्षरान्तं पठिते।

त्रिंश श्लोकः

श्लो तोषज्ञ श्रीर्वद्धूमाराड्वादीना स्वः सद्धा धीगः ।
राजज्ञेयस्स श्रीरामोक्षंतेने शोभा विद्यायुक् ।। 30

व्याख्याः- अस्यार्थः द्वितीयश्लोकार्थ एव ।

एकत्रिंशाक्षरादि त्रिंशाक्षरान्तं पठिते।

एक त्रिंश श्लोकः

श्लो षज्ञः श्रीमद्धूमाराड्वादीनास्वः सद्धाधीगोराः ।
जज्ञेयस्स श्रीरामोक्षं तेने शोभा विद्यायुक्तः ।। 31

व्याख्याः- अस्यार्थः प्रथमश्लोकार्थ एव ।

द्वात्रिंशाक्षराद्येकत्रिंशाक्षरपर्यन्तं पठिते।

द्वात्रिंश श्लोकः

श्लो ज्ञश्री मद्भूमाराड्वादीनास्वः सद्भाधीगोराजः ।

ज्ञेयस्स श्रीरामोक्षन्तेने शोभा विद्या युक्तोषः ।। 32

व्याख्याः- अस्यार्थः तृतीय श्लोकार्थ एव ।

इति कङ्कणबन्ध श्लोकः शिवम् ।



अष्टोत्तरसहस्रदलपद्मबन्धः

प्रथम वलय श्लोकः 32 अक्षराणि

श्लो भोसद्योदास्यवन्तोस्य तुलसीदामभक्तिदम् ।
स्तुवीत श्रीदयाधंवस्सुनयाख्यात लाभपम् ।।

द्वितीय वलय श्लोकः 32 अक्षराणि

श्लो ततं वेङ्कटरामज्ञ सुतो मञ्जुगलद्रसम् ।
कमलम्माहितपदे भासयन्मल्लिकार्जुनः ।।

तृतीय वलय श्लोकौ 2 : 64 अक्षराणि

श्लो एवमेतद्यथा तत्त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ।।
पश्यमे पार्थ रूपाणि शतशोथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ।।

चतुर्थ वलय श्लोकौ 2 : 64 अक्षराणि

श्लो मञ्जुयोगमिलद्भद्र सुसम्पत्करमञ्जुल ।
समाम्पाहिख्यातमाप वादेहेभातसच्छय ।।
सन्मतल्लिसृकावर्जुमनः स्मितमतंस्तवे
त्वाङ्कर्णाटधराराम प्राज्ञश्री सुमतोद्यम ।।

पञ्चम वलय श्लोकाः 128 अक्षराणि

श्लो यागीरूपभरम्मैतं वशिरक्षणधीरुचः ।
नमत्त तादात्म्यपद्मा ख्याता मे वेद नार्थदा ।।
लात्वापातस्त्वुवशमा पन्धीशोधिवशि सरस ।
सुप्रज सुज्ञो नानोदारं विद्यायदानिन्दवश्ये ।।
व्यासमते नाधास्यतवश्रीपदेकृतिन् ।
लसनित्रनते एतदागमेत्र सविद्यपभण्या ।।
त्थसत्तमे मामुदर्जुनं सच्छवे रम्यवीरा ।
स्वच्छस्तोत्रा द्रम्या श्रीक्षमि सभाक्षमिव ।।

पद्म बन्ध श्लोकाः

1 . सीतया रामगीते ते पदे एधित भो तव ।
म माध गीर्वाणतरू मञ्जुदाने मते शिव ।।

2. सरसपपदं शुभमयोपगतं परमेहितं सजनाश्री ।
रहसीशम्मैत्रगमगात्समस्तुत सुखोन्नतं स्रग्भम् ।।

3. देवत्वमिष्टविश्वग आर्यजवेद्यो वसुमहेशः ।
शिवमापरम्यं लभते तान्त्वद् ज्ञोधाब्जसूनाक्ष ।।

4. भास्सु प्रणमद्भम्पुण्याविष्णो नोत्थशङ्कदा सतव ।
धीना मस्त्युरुसद्रक्ति दोत्तमर्णात्वरं सुरुचः ।।

5. विगसनता सुखमेषोस्यलमाद्या एस्य भयमच्छधा ।
मस्वेषां मुत्तति सन्दन्त्वं धर्मदात्मासी पनिताय ।।

6. यासुदामपमर्जुत्वाऽऽनन्दनं सारा
वश्यासम्पत्स्यादिर्हृदाप सत्कस्तुता
च्छ मरापल्येर्वा पद्मात्व्यात्सन्मख्या
तोर आवेश्यप्रभ रसमं तोषं ममत
नितासे सौम्यमेधामवीड्ग प्राख्याते
मेशा दीना वेल्लितं वेद मञ्जुम्पाराभं
त्वाथाश्वर्थज्ञस्यते स्वसुनानाथाव्यर्थ -
च्छल तद्गीस्तोम श्रीरत स्तवादाव विकाला
भसचित्रारूढा भद्रश्रीसुतुल पद्मवर्णा
त्यालरम्यापातुल मा श्रीरमणादेष्टुंच
सुकृतर्जु भक्तिस्त्वामम्पाणि क्षमानतिन्
मित्रतो लघिमशिवर्तार्थ वशस्सहिदीद
भामद्यच्छासनाद्यमानि मनः पन्त्वं
ख्याताक्षत तेजोमित्र मसीमानमसिच
धीत्रातपशो ।।

3 द - 384

84 - 512 (64 एकैकस्य)

3 द - 96

1 द - 16

1008

कर्णिका

म 16 वारं 16

1024

2 अक्षरे 128

1152

प्रथमपङ्क्त्यां प्रथमवर्णः, नवमः वर्णः, सप्तदशवर्णः, पञ्चविंशतितमः वर्णः, त्रयस्त्रिंशत्तमः वर्णः, एकचत्वारिंशत्तमः वर्णः, 49-57-65-73-81-89-97-105-113-121- एते षोडशवर्णाः ।

पञ्चमवलये विद्यमानाः षोडशवर्णाः

एते द्वाविंशतितमः वर्णः, 24-26-28-30-32-2-46-8-10-12-14-16-18-20

प्रथमवलये विद्यमानाः

3-7-11-15-19-23-27-31-35-39-43-47-51-55-59-63-67-71-75-79-83-87-91-95-99-103-107-111-115-119-123-127 (द्वात्रिंशत् अक्षराणि)

तृतीयवलये

23-25-27-29-31-33-35-37-39-41-43-45-47-49-51-53-55-57-59-61-63-1-3-5-7-9-11-13-15-17-19-21 (द्वात्रिंशत् अक्षराणि)

व्दितीय वलये।

426-44-46-48-50-52-54-56-58-60-62-64-2-4-6-8-10-12-14-16-18-20-22-24-26-28-30-32-34-36-38-40 (द्वात्रिंशत् अक्षराणि)

चतुर्थवलये द्वात्रिंशत् अक्षरेभ्यः समः ।

अद्यभवभागवतः

54 अर्थाः निवेशितश्लोकः ।

वासुदेवानन्दगत श्लोकः

श्लो घनसार समाचारु रुचामासरसानघ ।
राजते रदमोदाश्री श्रीदामोदर ते ऽजरा ।।

एतत् अनुलोमविलोमवृत्तं भवति । भगवतः दन्तपङ्क्तिरत्र वर्णिता वर्तते ।(पादद्वयम्) दक्षिणतः वामतोऽपि श्लोकोऽयं पठितुं शक्यः।

आनघा मासरस श्रीदामोदरा ते रदमोदाश्री ।
घनसार समाचारुरुचा राजते ।।

=====

अनुबन्धः

वासुदेवानन्दस्य मुद्रितप्रतौ अनिबद्धाः काश्चन रचनाः

भगवत्कीर्ति प्रकरणम्

कोष्ठकबन्धः

1. कर्ता 2.कर्म

का	सा	ध्वी	गु	ण	शौं	डा
भो	ग	यु	ता	भू	रि	रु
चि	र	म्या	व	र्ण	य	ति
नि	पु	ण	सु	दृ	शां	र
क्षि	त्री	का	नि	सं	सि	द्धा

1. का साध्वी गुण शौंडा भोगयुता भूरि रुचि रम्या ।
वर्णयति निपुणसुदृशां रक्षित्री कानि संसिद्धा ।।

2. अवसि हरे वृजिन वतो
नवतोयदनील! वीक्ष्य भक्तिं त्वम् ।
गुर्व्या दययाऽमलया
मलयानिलवन्निदाघतापवतः ।।

3. ग्राहादगोपी द्विरदाग्रगण्यं
वित्ते कुचेलं विदधे कुबेरम् ।
नानावतारैर्दिविजानपासीत्
विष्णुस्स्वभक्तिं समवीक्षतेषु ।।

4. यस्यास्ति भक्तिर्भगवत्युपेन्द्रे

सतद्बलाद्विन्दति तत्प्रसादम्

प्रसादतस्तस्य किमस्ति दुर्लभं ?

*** *** *** ***

5. अयि मित्र करुणया मे

वद केवल भद्र भक्तिसम्पन्नाः ।

जानन्ति यागिवर्या-

स्सूरीणां कञ्जनेत्र भक्तियुतम् ।।

6. वादं वेदादिवेदी वदविद वद विद्वादि देवादि वादी

देवा देवादि देवो दिवि दिवि वद वद्वैव विद्वादि देव ।।

व्याख्याः- द्विव्यञ्जनमिदं पद्यम् ।

श्लो देवानां वादे वदेषु वक्तृषु आदिः प्रथमः
वुदुषः वेत्तीति विद्वद्वित् वादिनो विदन्तेति
वादि विद्धः तार् वेत्तेति वादि विद्वित् श्रीविष्णु
प्रकरणादवगम्तव्यम् । ददातीति दद (ददाति
दिदि धात्वोर्विभाषेतिशः) तं वेत्तीति ददवित्

व्याख्याः- नददा तीत्यर्थः सुपिस्थ इति सूत्रे सुपीतियोगविभागेन सुप्युपपदे अधन्तात्कश्श्वे दित्यर्थस्य सिद्धत्वात्कः – तं वेत्तीत्यदवित् दद विच्चासा वद विच्च तस्मै दद विददविदे अयमेव श्री विष्णुर्दद इति ज्ञायते इति गूढाभिप्रायः। वदवदेति वादात् आदौ अवादीति अवावेति वादात् वेदादि वेदं प्रणवं ददवे। वेदादिवेदी प्रणववेदी वद विदः वक्तृ विदश्च ता अवदविदः अवक्तृविदश्च वदविद वद विदः तौ च

ते वादिनश्च वदविद वद विद्वादिनः तौ च ते ते देवाश्च वदविद वद विद्वादि देवाः तेषां आदि वादी देवानाञ्च अदेवानाञ्च आदिदेवः श्रीविष्णुः वदवित् वक्तृ वित्सन्वा दैवि विद्या भागधेयवित्सन्वाः भक्ताः एते देवाः वक्तार इति ज्ञात्वा वा एतेषां भागधेयं समीचीनमिति ज्ञात्वा वेत्यभिप्रायः। दिवि दिवि स्वर्गे वादं दिदेव दिवः कर्मचेति वादस्य कर्मत्वम् ।

श्रीविद्यारण्यकृत - वेदान्तपञ्चदश्याः श्री - मन्त्रि - लक्ष्मी-नारायणामात्याः आन्ध्रटीकातात्पर्ये लिखित्वा श्री मल्लिकार्जुन शास्त्रिभ्यः दर्शयित्वा तेषामभिप्रायमपृच्छन् ।

स च तं बृहद्ग्रन्थं (प्रायशः 675 पृष्ठानि) हस्ते निक्षिप्य क्रमशः पृष्ठानि आवर्त्य साध्वित्युक्त्वा श्रीलक्ष्मीनारायणमन्त्रिभ्यः अददुः। रचयिता अतृप्ताऽभूवन्। "भवन्तः पठित्वा अभिप्रायं वदन्त्वि"त्यवदन्। तदा शास्त्रिणः "भवन्तः कामपि पृष्ठसङ्ख्यां वदन्त्वि"त्यवदन्। मन्त्रिभिः उक्ते पृष्ठे विद्यमानं विषयं सर्वमपि ते अवदन्। श्री मन्त्रिणां आश्चर्यस्यावधयः नासन्। श्रीशास्त्रिभिरुक्तमभिप्रायमत्र यथातथमुल्लिखितोऽस्ति ।

इयं घटना यस्यां वेदान्तपञ्चदशीप्रतौ विद्यते सः ग्रन्थः कदा कुत्र मुद्रितः इत्यादीन् बोध्यमानाः कर्गजाः न लब्धाः । पीठिकान्तः एव अयं ग्रन्थः लब्धः ।

अभिप्रायः

श्रीगुरो वासुदेव प्रसीद ।

ग्रन्थममुमधिकृत्य पण्डितसार्वभौमाणां शतावधानिनाम् आलुकूरु ग्राम निवासिनां गोल्लापिन्नि-मल्लिकार्जुनशास्त्रिणामाशयः-

अद्य खलु स समाधानेन चेतसा परं पदं समीहमानैर्निरन्तरं हृदन्तरे समन्ततो निदिध्यासितुमुत्सुकैरारुरुक्षुभिस्सप्रार्थितेन वेदान्त शास्त्रार्णवकर्णधारायितेन विद्वज्जनसन्नुतेन, मन्त्रि - लक्ष्मि नारायणाख्यावता सङ्ख्यावता सङ्ख्यिपता श्री मद्वेदान्तपञ्चशयान्ध्रटीका सतात्पर्या रामकृष्णपण्डित - विरचित व्याख्यानुसारिणी मया तत्र व्यलोकि। इयमेतन्निरन्तरद्रष्टॄणां बालानामुक्त-वक्तव्य-विवदिष्यमाणादि-भेदाभाववतया करतलामलक-वत्परात्मविद्यामादधती सती यथा निरपेक्षित भूयो ग्रन्थजालं मुक्तिमादिशतीति मन्मनः ।

श्लो हृद्या पदार्थतात्पर्यबोधिनी पापशोधनी ।
यशोधनैस्सद्भिरपि शोधनीया नवा भवेत् ।।